3 शक्तिमनतिक्रम्य–यथाशक्ति

Dvigu.

1 त्रयाणां भुवनानां समाहारः–त्रिभुवनम्
2 त्रयाणां लोकानां समाहारः–त्रिलोकी
3 द्वयोः मात्रोः अपत्यम्–द्वैमातुरः

Samâhâra-Dvandva.

1 गवां व्याघ्राणां च समाहारः–गोव्याघ्रम्

Digitized by Google

2 पाणी च पादौ च एषां समाहारः—पाणिपादम्

3 रथिकाश्च अश्वारोहाश्च एषां समाहारः—रथिकाश्वारोहम्

Bahuvrîhi.

1 दत्तं धनम् यस्मै सः—दत्तधनः

2 श्वेतम् अम्बरं यस्य सः—श्वेताम्बरः

3 चक्रं पाणौ यस्य सः—चक्रपाणिः

12. Give six instances of past passive participles in which the semi-vowel of the root is changed to the corresponding vowel, and six in which the termination assumes the form of न or ण.

वच् — उक्त	ग्रह् — गृहीत		भिद् — भिन्न	त्रै — त्राण	
वह् — ऊढ	स्वप् — सुप्त		कृ — कीर्ण	पृ — पूर्ण	
यज् — इष्ट	प्रच्छ् — पृष्ट		ग्लै — ग्लान	दू — दून	

13. Mention five roots which govern two objects, and give sentences using the passive forms of these and of the causal of कृ.

दुह्	गौः पयो दुह्यते ।
याच्	धनिको द्रव्यं याच्यते ।
नी	अजा ग्रामं नीयते ।
प्रच्छ्	माणवको मार्गं पृच्छयते ।
दण्ड्	शठः शतं दण्ड्यते ।

स्वामो भृत्येन or भृत्यं कर्म कारयति ।

14. What cases do ऋते, अनु, प्रति, and विना govern? Give sentences illustrative of their use.

14. ऋते governs the abl. ऋतेऽभ्यासान्न प्राप्यते ज्ञानम् ।

विना governs the instr., ज्ञानेन वा ज्ञानम्, ज्ञानाद्वा—abl. or acc. विना न सुखम् ।

अनु & प्रति } govern the acc. भक्तो विष्णुमनु । गृहान् प्रति यास्यामि ।

Digitized by Google

15. Frame sentences using the nom., acc., and loc. of the present participle, the genitive absolute, the acc. of the past participle active, and the instr. of the passive past participle.

N.B.—In framing the sentences required, the candidate is not allowed to use a word more than once.

15. खादन्न गच्छेत् । क्रुध्यन्तं न वदेत् । पुत्रे रुदति प्राव्राजीत् ।
माकुर्वित्युक्तवतो मे किं त्वयैतत्कृतम् ।
उद्योगं कृतवन्तं संपदः स्वयमेव वृणते ।
न्यायेनार्जितेन वित्तेन धर्मः कार्यः ।

1877.

1. (*a*) Combine according to the rules of Sandhi, the following:— सा + ओषधि; कर्तृ + अस्ति; तौ + इह; अप + एति; गिरी + इह; तान् + जनान्; पुनः + सः; रविः + रूढः; पुनः + इह; सः + अब्रवीत्. Also the following compounds:— वृक्ष + छाया; मनस् + गत; बिम्ब + ओष्ठ and गो + अग्र.

(*b*) State the rule about the change of dental न् into lingual ण् and give examples.

(*c*) Write the following sentences correctly:—

(1) वने भ्रमतः अपि तस्य रविः अस्तम् गतः ।

(2) सः च मया बालः अयम् इति मत्वा न व्यापादितः ।

(3) तस्मात् मम अयम् तृतीयः पुत्रः भविष्यति ।

1. (*a*) सौषधिः; कर्त्रस्ति; ताविह or ता इह; अपैति; गिरी इह; ताञ्जनान्; पुनः सः or पुनस्सः; रवी रूढ; पुनरिह; सोऽब्रवीत्.

वृक्षच्छाया or वृक्षच्छाय; मनोगत; बिम्बौष्ठ or बिम्बोष्ठ; गोग्र or गोअग्र or गवाग्र.

Digitized by Google

(*b*) Vide Sanskrit First Book pp. 15 Rule ||

(*c*) (1) वने भ्रमतोऽपि तस्य रविरस्तंगतः

(2) स च मया बालोऽयमिति मत्वा न व्यापादितः

(3) तस्मान्ममायं तृतीयः पुत्रो भविष्यति.

2. Give the first case—sing. du. and plu.—of the following :—त्वच्, आशिष्, गिर्, धनिन्, सुमनस् m. f. n. गरीयस् m. n.; अनेहस्, बोधत्, m. n. अग्नि, लक्ष्मी, स्त्री, अनडुह्, अप्, and पथिन्.

2.	त्वक् or ग्	त्वचौ	त्वचः	अनेहा	अनेहसौ	अनेहसः
	आशीः	आशिषौ	आशिषः	m. बोधन्	बोधन्तौ	बोधन्तः
	गीः	गिरौ	गिरः	n. बोधत्	बोधती	बोधन्ति
	धनी	धनिनौ	धनिनः	अग्निः	अग्नी	अग्नयः
	m. f. सुमनाः	सुमनसौ	सुमनसः	लक्ष्मीः	लक्ष्म्यौ	लक्ष्म्यः
	n. सुमनः	सुमनसी	सुमनांसि	स्त्री	स्त्रियौ	स्त्रियः
	m. गरीयान्	गरीयांसौ	गरीयांसः	अनुड्वान्	अनुड्वाहौ	अनुड्वाहः
	n. गरीयः	गरीयसी	गरीयांसि	०	०	आपः
				पन्थाः	पन्थानौ	पन्थानः

3. Give the 3rd case singular of the following :—सुपाद्, पुंस्, हृदय, पाद, दोस्, भूपति, कर्तृ, विश्वपा, अक्षि, अग्नि, सखि, विद्वस्, श्वन्, सुदृश्.

सुपदा, पुंसा, हृदयेन or हृदा, पादेन or पदा, दोषा or दोष्णा, भूपतिना, कर्त्रा, विश्वपा, अक्ष्णा, अग्निना, सख्या, विदुषा, शुना, सुदृशा.

4. How is the fem. base of the present part. (par.) formed ? Give an example from each of the ten classes.

4. Vide Dr. Kielhorn's Grammar pp. 31 § 103 रक्षन्ती, रुदती, जुह्वती, दीव्यन्ती, चिन्वती, मुञ्चती-मुञ्चन्ती, रुन्धती, तन्वती, क्रीणती, चोरयन्ती.

5. Decline अस्मद्.

5. Vide Sanskrit First Book pp. 100.

Digitized by Google

6. Decline in the feminine :—एतद्. Give the optional forms, and say when they are used.

6. For the first part see Sanskrit F. B. pp. 96 and 97 Rules 4 and 5. The optional forms of एतद् are used when the pronoun is to be used a second time for the same person or thing once mentioned.

7. What is the Sanskrit for eight, sixteen, twenty-nine, forty-two, fifty, ninety-nine and four hundred.

7. अष्टन्; षोडशन्; नवविंशति or एकोन-ऊनत्रिंशत्; द्विचत्वारिंशत् or द्वाचत्वारिंशत्; पञ्चाशत्; नवनवति or एकोनशत; चत्वारि शतानि.

8. Decline चतुर् m. f. n.

8. Vide Sanskrit S. B. pp. 100 and 101 Rules 4, 5, and 6.

9. Give the 3rd pers. sing. (par. âtm. or both if both are used) of the pres. and perf. of क्रम्, घ्रा, विद् (to find), स्था, नी, आस् and ऊर्णु.

9. Pres.		Perf.	
Par.	Âtm.	Par.	Âtm.
क्रामति-क्राम्यति	आक्रमते	चक्राम	चक्रमे
जिघ्रति	No form	जघ्रौ	Nil.
विन्दति	विन्दते	विवेद	विविदे
तिष्ठति	प्रतिष्ठते	तस्थौ	प्रतस्थे
नयति	नयते	निनाय	निन्ये
Nil.	आस्ते	Nil.	आसांचक्रे
ऊर्णोति-ौति	ऊर्णुते	ऊर्णुनाव	ऊर्णुनुवे

10. Give the 1st, 2nd, and 3rd pers. sing. (paras. or âtm. or both if both are used) of the imperf. and simple fut. of अद्, पत्, कृ, अस् and विद् (to know).

Digitized by Google

10.

Imperf.			Simple fut.		
1st pers.	2nd pers.	3rd pers.	1st pers.	2nd pers.	3rd pers.
आदम्	आदः	आदत् (P.)	अत्स्यामि	अत्स्यसि	अत्स्यति
अपतम्	अपतः	अपतत् (P.)	पतिष्यामि	पतिष्यसि	पतिष्यति
अकरवम्	अकरोः	अकरोत् (P.)	करिष्यामि	करिष्यसि	करिष्यति
अकुर्वि	अकुरुथाः	अकुरुत (Â.)	करिष्ये	करिष्यसे	करिष्यते
आसम्	आसीः	आसीत् (P.)	भविष्यामि	भविष्यसि	भविष्यति
अवेदम्	अवेत्-द्-वेः	अवेत्-द् (P.)	वेदिष्यामि	वेदिष्यसि	वेदिष्यति

11. Dissolve the following compounds, and state to which class each belongs:—**नीलोत्पल, सपुत्र, पुरुषव्याघ्र, प्राप्तजीविक, दुःखातीत, राजान्तर, वृकभीत, धर्मपथ, अनश्व, मातृसदृश, अपुत्र.**

11. नीलं च तदुत्पलं च— नीलोत्पलम् (Karm.)
पुत्रेण सहितः— सपुत्रः (Bahuv.)
पुरुषो व्याघ्र इव— पुरुषव्याघ्रः (Karm.)
प्राप्ता जीविका यम्— प्राप्तजीविकः (Bahuv.)
" येन " (Do.)
प्राप्तो जीविकाम् " (Tatp.)
दुःखमतीतः— दुःखातीतः (Do.)
अन्यो राजा— राजान्तरम् (Do.)
वृकाद्भीतः— वृकभीतः (Do.)
धर्मस्य पन्थाः— धर्मपथः (Do.)
न अश्वः— अनश्वः (Do.)

अनश्वः will also be a Bahuvrîhi compound & may be thus dissolved:—न विद्यते विद्येते विद्यन्ते वा अश्वः अश्वौ अश्वाः वा यस्य सः.

मात्रा सदृशः— मातृसदृशः (Tatpurusha.)

अपुत्र like अनश्व may be classed as Tatp. or Bah.

12. Give four nouns which undergo change at the end of a Bahuv. compound. State the rule, and give an example for each.

Digitized by Google

12. धनुस् is changed to धन्वन् as अधिज्यधन्वन्
अश्नि ——— अश्न —— कमलाक्ष
धर्म ——— धर्मन् —— सुधर्मन्
जाया ——— जानि —— सीताजानि

1878.

1. Give the rule for the change of न् to ण् in the interior of words, and illustrate it by examples.

1. See Sanskrit F. B. pp. 15 Rule ||.

2. Decline in the dual:—**अहन्**, **उपानह्**, **देवृ**, the feminine of **निर्नीवस्**, **पाद**, **भूयस्** neut. the feminine of **वात्**, **सदृश** masc.

2. N. V. Acc.	अहनी-अह्नी	उपानहौ	देवरौ	निन्युष्यौ
Instr. Dat.	,, अहोभ्याम्	,, उपानद्भ्याम्	,, देवृभ्याम्	,, निन्युषीभ्याम्
Abl.	,,	,,	,,	,,
Gen. Loc.	,, अह्नोः	,, उपानहोः	,, देवोः	,, निन्युष्योः
N. V. Acc.	,, पादौ	,, भूयसी	,, वात्यौ-न्त्यौ	,, सदृशौ
Instr. Dat. & Abl.	,, पादाभ्याम्-पद्भ्याम्	,, भूयोभ्याम्	,, वातीभ्याम्-वान्तीभ्याम्	,, सदृभ्याम्
Gen. & Loc.	,, पादयोःपदोः	,, भूयसोः	,, वात्योः-वान्त्योः	,, सदृशोः

3. Decline **षष्** and **पूर्व** masc. in the plural.

3. Nom.	षट्-षड्	पूर्वे	Dat. Abl.	षड्भ्यः	पूर्वेभ्यः
Acc.	,,	पूर्वान्	Gen.	षण्णाम्	पूर्वेषाम्
Instr.	षड्भिः	पूर्वैः	Loc.	षट्सु.	पूर्वेषु.

4. Give the 3rd plur. present, 2nd sing. imperat, 1st plur. potential 3rd sing. imperf. in par. âtm. (or both if both are used) of **इष्**, **ईश**, **घ्रा**, **धा**, **लिह्**, **सो**, **हन्**.

Digitized by Google

4. Pres.	Imper.	Pot.	Imperf.
इच्छन्ति	इच्छ	इच्छेम	ऐच्छत्
ईशते	ईशिष्व	ईशीमहि	ऐष्ट
जिघ्रन्ति	जिघ्र	जिघ्रेम	अजिघ्रत्
दधति-दधते	धेहि-धत्स्व	दध्याम-दधीमहि	अदधात्-अधत्त
लिहन्ति-लिहते	लीढि-लिक्ष्व	लिह्याम-लिहीमहि	अलेट्-ह्-अलीढ
स्यन्ति	स्य	स्येम	अस्यत्
घ्नन्ति	जहि	हन्याम	अहन्

5. Which roots *must* and which *may* form the periphrastic perfect ? Illustrate your rules by examples.

5. Vide Sanskrit Second Book pp. 80 and 81 Rules 12 and 13.

6. Give the 2nd sing. and plur. of the aorist in par. or âtm. (or both if both are used) of इ, कृ, गम्, दृश्, पत्, प्रच्छ्, बन्ध्, स्पृश्.

6. *Sing.*	*Plu.*	*Sing.*	*Plu.*
अगाः	अगात	अपप्तः	अपप्तत
अकारीः	अकारिष्ट	अप्राक्षीः	अप्राष्ट
अगमः	अगमत	अभान्त्सीः	अबान्द्ध
अद्राक्षीः-अदर्शः	अद्राष्ट-अदर्शत	अस्पार्क्षीः-स्प्राक्षीः	अस्प्राष्ट-स्पार्ष्ट

7. Give the 3rd sing. present of the passive and of the desider. of कृ, ग्रह्, चुर्, तन्, दा, दिव्, भिद्,

7. Pass.	Desid.
कीर्यते	चिकरिषति
गृह्यते	जिघृक्षति
चोर्यते	चुचोरयिषति
तन्यते	तितनिषति-तितंसति-तितांसति
दीयते	दित्सति
दीव्यते	दुद्यूषति-दिदेविषति
भिद्यते	बिभित्सति

8. Distinguish between *primary* and *secondary* nouns.

8. Nouns directly derived from roots or names of objects visible, or invisible but having an existence in the mind are *primary*.

Digitized by Google

Nouns derived from *primary* nouns by Taddhita affixes or by way of compounds are *secondary*.

9. Give the part. of redupl. perf. par. and the gerunds in त्वा and य of अस्, तन्, यज्, स्तु, हन्.

9.

बभूवस् (to be)	भूत्वा (to be)	संभूय (to be)
आसिवस् (to throw)	असित्वा (to throw)	प्रास्य (to throw)
तेनिवस्	तनित्वा	वितन्य-तत्य
ईजिवस्	इष्ट्वा	अनुयज्य
तुष्टुवस्	स्तुत्वा	संस्तुत्य
जघ्निवस्-जघन्वस्	हत्वा	निहन्य-हत्य

10. Give rules for the changes of गो at the end of Tatpurusha and of धर्म at the end of Bahuvr. compound. Give examples.

10. गो at the end of a Tatpurusha is changed to गव्. Ex:— परमगव; धर्म is changed to धर्मन् as मनुष्यधर्मन्.

11. Translate into Sanskrit :—

(*a*) Râma was dearer[1] to Sîtâ than any[2] other man.

(*b*) This is the king of Avantî, who is long-armed, broad-breasted, and slender waisted (use compounds)

(*c*) Do not cut (aor. of छिद्) the branches of this tree.

(*d*) He arrived[4] on the 26th[5].

(*e*) He makes me dwell (causal) here 39 days.[6]

(*f*) He made the pupil[7] study (causal of अधि-इ) his lesson.[7]

(*g*) They intended to gather (desider. of अवचि) flowers.

(*h*) He dines without having bathed.

11. (1) प्रेयस् (2) Use the ablative. (3) अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षास्तनु···मध्यः (4) आप् with प्र, गम् with आ. (5) षड्विंशतितमी-षड्विंशी तिथि;० तम- ० श दिवस. (6) Use the accusative. (7) Put both in the accusative (*h*) अस्नात्वा भुङ्क्ते.

Digitized by Google

TRANSLATION.

1862.

I. Translate into Sanskrit :—

Glory be to Thee, [1] O God, without beginning, [2] self-existent, [3] invisible, [4] infinite, [5] most pure [6] and of spiritual nature. [7] Thou art omnipresent, [8] omniscient, [9] and almighty: [10] the non-apparent cause [11] of the apparent, [12] and the source of life. [13] Thou alone [14] art eternal: [15] besides Thee [16] there existed not [17] in the beginning [18] anything sentient [19] or non-sentient. [20] Who even of the inhabitants of heaven [21] can tell the infinite [22] power [23] of Thee, who, being without beginning and self-existent, didst create the non-existent [24] worlds? [25] Striving [26] to ascend to the inaccessible [27] abode [28] of Thy pure [29] glory, [30] my mind [31] returning [32] downward sinks, [33] like an arrow [34] aimed [35] at the sky. In the beginning, Thou of infinite power, willing to create [36] the universe moveable and immoveable [37] didst say *Let it be*, and straightway [38] the universe was. [39] By Thee was this earth formed [40] surrounded [41] by the clear firmament, [42] beautiful, watered by rivers [43] and adorned with trees. [44] But this earth, though regarded [45] by men as vast, [46] is but as an atom [47] in the universe which Thou hast created. The sky filled with stars, [48] which are in appearance small, [49] but are in reality [50] worlds, shows forth [51] thy illimitable [52] power. [53]

I. (1) जय, विजयस्व, विजयोऽस्तु (2) अनादि (3) स्वयंभू, आत्मभू (4) अचक्षुर्विषय (5) अपरिमेय, अप्रमेय, इयत्तारहित (6) पवित्राणां पवित्र (7) चिद्रूप, ज्ञानस्वरूप, चैतन्यविग्रह (8) सर्वव्यापिन्, व्यापक, सर्वात्मक,

Digitized by Google

चराचरव्यापिन्, विश्वात्मन् (9) सर्वज्ञ, सर्वज्ञाश्रिन् (10) अनन्तवीर्य, अमितौजस्, सर्वशक्तिमत्, सर्वप्रभु (11) अव्यक्तं कारणम्, अदृश्यं कारणम् (12) व्यक्त, दृश्य (13) जीवहेतु (14) त्वमेव (15) शाश्वत, सनातन (16) त्वदृते (17) नासीत्, नावर्तत (18) आदौ (19) सजीव, चैतन्ययुक् (20) निर्जीव, अचेतन (21) दिवौकस्, दिविषद् (22) अमित (23) प्रभाव (24) असत् (25) विश्व (26) प्रयतमान (27) दुरवगाह, दुरासद (28) धामन् (29) शुक्र (30) तेजस् (31) 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' (32) परावर्तमान (33) पत्, मस्ज् (34) 'पृषत्कबाणविशिखा अजिह्मगखगाशुगाः। कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः' ॥ (35) कृतसंधान, क्षिप्र (36) सिसृक्षु (37) चराचरं जगत् (38) सद्यः, सपदि (39) विश्वमजायत (40) सृष्ट (41) परिवृत (42) आकाश, द्यो, नभोमण्डल (43) नैकनदीप्रवाहयुत, आप्लावित (44) वृक्षोपशोभित (45) मत (46) विशाल, विस्तृत (47) अणु, परमाणु (48) तारकित (49) लघु (50) तत्त्वतः, परमार्थतः (51) caus. of दृश् (52) अद्भुत, निःसीम (53) सामर्थ्य, शक्ति, ओजस्.

II. Translate into English :—

त्वं कस्यापि मृषापवादं न गृहाण। मृषा साक्षीभवन्दुष्टस्य साहाय्यं मा कुरु च। त्वमसत्कर्म कर्तुं बहुलोकानां पश्चान्मा गच्छ। विचारेऽन्यायं कर्तुं च बहुलोकानां पक्षो भवन्मा प्रतिवद। दरिद्रस्य कृतेऽपि विचारे पक्षपातं मा कार्षीः। त्वं रिपोर्गां गर्दभं वान्यन्नभ्रमन्तं विलोक्य तत्समीपमवश्यं नेष्यसि। त्वं स्वर्तीयिनो गर्दभं भाराधःपतन्तं निरीक्ष्य तं विहाय मा गाः; अवश्यं तेन साकं तमुपकरिष्यसि। विचारे दरिद्राय मान्यायं कार्षीः। मृषा विवादादूरे तिष्ठ, निर्दोषं धार्मिकं च मा नाशय, यतोऽहं दुष्टं निर्दोषं न करिष्यामि। त्वमुत्कोचं मा ग्रहीः, यत उत्कोचेन ज्ञानिनोऽप्यन्धीभवन्ति। धार्मिकाणा-

Digitized by Google

मपि वागन्यथाभवति । विदेशिनं नोपद्रवय । यूयं स्वप्रभुपरमेश्वरं सेवध्वम् । ततः स युष्माकमन्नतोये प्रत्याशिषं वक्ष्यति । किं च युष्मत्तोऽहं व्याधीनपसारयिष्यामि.

II. [Vide The Holy Bible Exodus Chap. XXIII. Verses 1—9 and 25.]

(1.) Thou shalt not raise a false report: put not thine hand with the wicked to be an unrighteous witness.

(2.) Thou shalt not follow a multitude to do evil; neither shalt thou speak in a cause to decline after many to wrest judgment.

(3.) Neither shalt thou countenance a poor man in his cause.

(4.) If thou meet thine enemy's ox or ass going astray, thou shalt surely bring it back to him again.

(5.) If thou see the ass of him that hateth thee lying under his burden and wouldest forbear to help him, thou shalt surely help with him.

(6.) Thou shalt not wrest the judgment of thy poor in his cause.

(7.) Keep thee far from a false matter; and the innocent and righteous slay thou not, for I will not justify the wicked.

(8.) And thou shalt not take a gift; for the gift blindeth the wise and perverteth the words of the righteous.

(9.) Also thou shalt not oppress a stranger.

(25.) And ye shall serve the Lord your god and he shall bless thy bread and thy water; and I will take sickness away from the midst of thee.

1863.

I. Translate into Sanskrit :—

Star[1] of descending[2] night[3]! fair[4] is thy light[5] in the west![6] thou liftest[7] thy unshorn head[8] from thy cloud;[9] thy

Digitized by Google

steps [10] are stately [11] on thy hill. [12] What dost thou behold in the plain? [13] The stormy winds [14] are laid. [15] The murmur [16] from the torrent [17] comes [18] from afar. [19] Roaring [20] waves [21] climb the distant [22] rock. [23] The flies [24] of evening [25] are on their feeble wings; [26] the hum [27] of their course [28] is on the field. What dost thou behold, fair light? [29] But thou dost smile [30] and depart. [31] The waves come with joy around thee: they bathe thy lovely hair. [32] Farewell, [33] thou silent beam! [34]

(*Macpherson's Ossian.*)

I was busy [35] one morning [36] upon something, [37] when I called to Friday, [38] and bid him go to the seashore [39] and see if he could find a turtle [40] or tortoise, [41] a thing which we generally [42] got once [43] a week, [44] for the sake of the eggs [45] as well as the flesh. [46] Friday had not been long gone [47] when he came running [48] back, and flew over [49] my outer-wall [50] or fence, [51] like [52] one that felt not the ground [53] or the steps [54] he set his feet on, [55] and before I had time to speak to him [56] he cried out to me: "O master! O master! O sorrow! O bad!" [57] "What's the matter, Friday?" said I, "O yonder [58] there," said he, "one, two, three canoes; [59] one, two, three." I concluded [60] there were six, but on inquiry [61] I found it was but three. "Well, Friday," said I, "do not be frightened." [62]

(*Robinson Crusoe.*)

I. (1) 'नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्' (2) अवतृ, आपत् (3) 'अथ शर्वरी। निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा। विभावरीतमस्विन्यौ रजनी यामिनी तमी' ॥ (4) शुभ्र, द्योतमान, दीप्यमान, प्रकाशमान (5) 'प्रकाशो द्योत आतपः' (6) प्रतीची, पश्चिमा. (7) उन्नमय् (8) प्रभापूर्ण,

Digitized by Google

दीप्तितरल (9) 'अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः। धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ॥ घनजीमूतमुदिरजलमुग्धूमयोनयः' । (10) पद, पादन्यास (11) धीर, धीरोद्धत (12) 'महीध्रे शिखरिक्ष्माभृद्दहार्यधरपर्वताः। अद्रिगोत्रगिरिभावाचलशैलशिलोच्चयाः' ॥ (13) समभूभाग, समविस्तीर्णभूभाग, समदेश (14) वात्या, झञ्झावात (15) शम् with प्र (16) कलध्वनि, गुञ्जितम् (17) 'प्रवाहो निर्झरो झरः' (18) आयाति, श्रूयते (19) दूरतः (20) गर्ज् (21) 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः' (22) दूरदेशवर्तिन् (23) शिलोच्चय (24) मशक (25) सायंतन (26) लुलित, क्षीणपक्षका इतस्ततो भ्रमन्ति (27) कूजितम् (28) भ्रमतां तेषाम् (29) भास्वरप्रकाश तारक (30) हस्, स्मि, ईषत् विकस् (31) निर्गम् (32) 'चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः' (33) स्वस्त्यस्तु ते, शिवास्ते पन्थानः (34) अस्तंगत. (35) व्यापृत (36) एकस्मिन्-कस्मिंश्चिद्दिने प्रातः, अहर्मुखे. 'प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि' (37) कस्मिन्नपि कर्मणि (38) एतन्नामा नरः (39) समुद्रतट, तीर, वेला (40) जन्तुविशेषः (41) 'कूर्मे कमठकच्छपौ.' (42) प्रायः, बहुशः (43) एकवारं, सकृत् (44) सप्ताह (45) अण्ड (46) 'पिशितं तरलं मांसं पललं क्रव्यमामिषम्' (47) गतस्य तस्य न भूयान्कालोऽतीतः (48) यावत्स धावन्नेव प्रत्यागतः—जगाम. (49) उत्सु (50) बहिःकुड्यम्, 'भित्तिः स्त्री कुड्यमेडूकम्' (51) 'प्राचीरं प्रान्ततो वृतिः' (52) इव (53) भूमिमस्पृशन् (54) सोपान, सोपानपङ्क्ति (55) निहितपद (*Bahu*). (56) मां वचनावकाशमदत्त्वा-त्वैव. (57) कष्टं कष्टम्, हा धिक् (58) अदूरे (59) 'उडुपं तु प्लवः कोलः' (60) बुध्, अवगम् (61) निरूपणम्, अन्वेषणम् (62) मा भैषीः

II. Translate into English:—

अस्ति दक्षिणापथे सुवर्णवती नाम नगरी। तत्र वर्धमानो नाम वणिङ्निवसति। तस्य प्रचुरेऽपि वित्तेऽवरान्बन्धूनतिसमृद्धान्समीक्ष्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव। इति संचिन्त्य नन्दकसंजीवकनामानौ वृषभौ धुरि नियुज्य शकटं नानाविधद्रव्-

Digitized by Google

व्यपूर्णं कृत्वा वाणिज्येन गतः काश्मीरं प्रति। अथ गच्छतस्तस्य सुदुर्गनाम्नि महारण्ये संजीवको भग्नजानुर्निपतितः। तमालोक्य वर्धमानोऽचिन्तयत्। संजीवकं तत्र परित्यज्य वर्धमानः पुनः स्वयं धर्मपुरं नाम नगरं गत्वा महाकायमन्यवृषभमेकं समानीय धुरि नियोज्य चलितः। ततः संजीवकोऽपि कथं कथमपि स्वरन्ध्रे भरं कृत्वोत्थितः। ततो दिनेषु गच्छत्सु संजीवकः स्वेच्छाहारविहारं कृत्वारण्यं भ्राम्यन्हृष्टपुष्टाङ्गो बलवान्नर्नाद। तस्मिन्वने पिङ्गलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनुभवन्निवसति। स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छमागच्छत्। ते च (?) तत्र सिंहेनाननुभूतमकालघनगर्जितमिव संजीवकमर्दितमश्रौषुः। तच्छ्रुत्वा पानीयमपीत्वा सचकितः परिवृत्य स्वस्थानमागत्य किमिदमालोचयंस्तूष्णीं स्थितः। स च तथाविधः करटकदमनकाभ्यामस्य मन्त्रिपुत्राभ्यां शृगालाभ्यां दृष्टः। तं तथाविधं दृष्ट्वा दमनकः करटकमाह। सखे करटक किमित्ययं उदकार्थी स्वामी पानीयमपीत्वा सचकितो मन्दंमन्दमवतिष्ठते। करटको ब्रूते। मित्र दमनकास्मन्मतेनास्य सेवैव न क्रियते, यदि तथा भवति तर्हि किमनेन स्वामिचेष्टानिरूपणेनास्माकम्। यतश्चानेन राज्ञा विनापराधेन चिरदिवसमवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतम्।

II. (1) In the Southern districts, region (2) A great deal, much, abundant, in large quantity (3) Commodities, merchandise (4) Broken-kneed (5) Big, of great size (6) With difficulty, by hook or crook (7) On three hoofs, three legs (8) Got up supporting himself (9) In course of time (10) Bellowed (11) Marshy bank (12) Was heard, aorist pass. of श्रु (13) silent.

Digitized by Google

1864.

1. Translate the following passage into English :—

अस्ति मगधदेशे चम्पकवती नामारण्यानी[1] । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन्हृष्टपुष्टाङ्गः केनचिच्छृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत् । आः कथमेतन्मांसं सुललितं भक्षयामि । भवतु[3] । विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत्[4] । मित्र कुशलं ते[5] । मृगेणोक्तम् । कस्त्वम् । स ब्रूते । क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि[6] । इदानीं त्वां मित्रमासाद्य[7] पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि[8] । अधुना तवानुचरेण मया सर्वथा भवितव्यमिति । मृगेणोक्तम् । एवमस्तु । ततः पश्चाद्[9]स्तंगते भगवति सवितरि मरीचिमालिनि[10] तौ मृगस्य वासभूमिं[11] गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत् । सखे कोऽयं द्वितीयः । मृगो ब्रूते । जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः । काको ब्रूते । मित्र अकस्मादागतेन सह विश्वासो न युक्तः । तन्न भद्रमाचरितम्[13] ॥

1. (1) नाम + अरण्यानी. The word अरण्यानी is fem. It means a large forest. 'महारण्यमरण्यानी.' (2) Delicate, sweet, tender, savoury, (3) Well (4) Create confidence, (I shall act in such a manner that he will place confidence in me) (5) इति + आलोच्य + उपसृत्य + अब्रवीत् Thus weighing, considering and (then) approaching (him) said (6) A question. Are you all well? How do you do? (7) Live here like one dead, being without a relation or a friend (8) Having got (9) I have entered as it were the world of living persons being now with a friend or relation in you (10) Set (11) An adj. Shining

Digitized by Google

or appearing splendid with its rays (12) Place of residing (13) You have not done well.

2. Translate the following passage into Sanskrit :—

In a country called Vidyodyâna lived a king called Vidavan : from his time till now a thousand years [1] have elapsed [2]. Many learned men who were honoured [3] by that king, who were friendly to learning, [4] constantly [5] frequented [6] his royal assembly. [7] Among these there was a Pandit named Mangala, adorned with various good qualities [8], and an eminent [9] astronomer. [10] He, having examined [11] the circle of the sky [12] by the application [13] of various [14] instruments [15], composed a new work called Siddhántárka. This book, having speedily [16] attained celebrity [17] in the whole of India, was read [18] by all the best astronomers of that time. When thirty years had elapsed [19] after the composition of his book, that renowned learned man Mangala became an inhabitant of another world. [20] In that very [21] year a certain very intelligent child, named Shukra, was born [22] in the house of another Pandit. When Shukra had attained to youth [23] being desirous to understand [24] the science of astronomy [25] he read the Siddhánta of Mangala with his teacher. [26] And having attained proficiency [27] in science, when he was of middle age [28] he wrote a Siddhánta named the Shukra Siddhánta.

(Dr. John Muir.)

2. (1) सहस्रं वत्सराः 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः' (2) अतिक्रान्ताः, व्यतीयुः (3) पूजित, सत्कृत, संमानित (4) प्रियविद्य, विद्याप्रिय, विद्यावत्, विद्याप्रणयिन् (5) अजस्रम् 'सततेऽनारताश्रान्तसंततानिरतानिशम् । नित्यानवरताजस्रम्' । (6) गम्, सद् with आ caus; समा-

Digitized by Google

सदाः भू. (7) राजसभा, परिषद्. 'समज्या परिषद्गोष्ठी सभासंमतिसंसदः । आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः'। (8) नैकगुणोपेतः, विविधगुणयुतः (9) विश्रुत, प्रथित, महायशस्. 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः, (10) 'सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि । स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि' ॥ (11) ईक्ष् wtih निर्, परि &c. रूप् with नि, लोच् with आ (12) नभोमण्डल, वियन्मण्डल (13) उपयोग (14) विविध, (15) यन्त्र (16) 'अथ शीघ्रं त्वरितं लघुक्षिप्रमरं द्रुतम् । सत्वरं चपलं तूर्णमविलम्बितमाशु च' ॥ (17) प्रसिद्धि गम्. Use the loc. Abs. (18) पठ् (19) Loc. Abs. (20) परलोकातिथिः भू, परलोकनिवासी भू. (21) एव (22) जन्, भू with प्रादुर् (23) यौवनपदवीमारुह्, यौवनदशां प्राप् (24) जिज्ञासमान, बुभुत्सु. (25) ज्योतिःशास्त्र (26) गुरुसंनिधि (27) प्रावीण्यमुपगत (28) मध्यमवयस्.

1866.

1. Translate into English the following passages :—

(a) **अस्ति मगधदेशे धर्मारण्यसंनिहितायां वसुधायां शुभदत्तनाम्ना कायस्थेन विहारगृहं कारयितुमारब्धम् । तत्र करपत्रविदार्यमाणकाष्ठस्तम्भस्य कियद्दूरस्फाटितस्य खण्डद्वयस्य मध्ये कीलकैः सूत्रधारेण निहितः । तत्र तद्वनवासी बलवान्वानरयूथः क्रीडनार्थमायातः । तेष्वेको वानरः कालदण्डप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टः । ततस्तस्य मुष्कद्वयं लम्बमानं काष्ठखण्डद्वयाभ्यन्तरे प्रविष्टम् । अनन्तरं सहजचपलतया महता प्रयत्नेन कीलकमाकृष्टवान् । आकृष्टे च कीलके काष्ठाभ्यां चूर्णिताण्डद्वयः पञ्चत्वं गतः । अतोऽहं ब्रवीमि । अव्यापारेषु व्यापारमित्यादि । दमनको ब्रूते । तथापि स्वामिचेष्टानिरूपणं**

Digitized by Google

भृत्येनावश्यं कर्तव्यम्। करटको ब्रूते। सर्वस्मिन्नधिकारे य एव नियुक्तः प्रधानमन्त्री स करोतु। यतोऽनुजीविना पराधिकारचर्चा न कर्तव्या। पश्य।

पराधिकारचर्चां यः कुर्यात्स्वामिहितेच्छया।
स विषीदति चित्कारोत्ताडितो गर्दभो यथा॥

(Hitopadesha.)

(*b*) पतिव्रतासि सावित्रि तथैव च तपोन्विता।
अतस्त्वामभिभाषामि विद्धि मां त्वं शुभं यमम्॥
अयं ते सत्यवान्भर्ता क्षीणायुः पार्थिवात्मजः।
नेष्याम्येनमहं बद्ध्वा विद्ध्येतन्मे चिकीर्षितम्॥

सावित्र्युवाच।

श्रूयते भगवन्दूतास्त्वामागच्छन्ति मानवान्।
नेतुं किल भवान्कस्मादागतोऽसि स्वयं प्रभो॥

(Sávitryupákhyána)

1. (1) A saw (2) A wedge (3) A carpenter (4) As if driven or sent by the stick of Death (5) Pair of testicles (6) Watching, observing (7) Meddling or interfering with the duties of another functionary (8) Is sorry, mourns (9) Braying (10) That which is wished to be done, purpose.

2. Translate into Sanskrit the following passages :—

(a) For knowledge [1] is better [2] than wealth [3] and virtue [4] is better than knowledge; and God is better than other sentient [5] beings. Wealth therefore ought to be sought after with less love; knowledge with greater, and virtue with greater still. [6] But God, Who is the most excel-

Digitized by Google

lent [7] of all objects, should be sought after with the greatest love. The soul, though continually desiring numerous worldly objects, [8] when it completely attains the enjoyment of them does not find satisfaction. [9] Except God there is no other object in the three worlds [10] capable of satisfying the souls of the human race. The affections [11] which seek God (as their object) [12] faith, [13] love, [14] reverence, [15] and others of the same kind, exist in men by nature. [16] And God, from being distinguished [17] by mercy, [18] greatness, [19] purity, [20] &c., is the supreme object of these affections, love, and the rest. [21] There is therefore no doubt that God created in men such affections, love, and the rest, for His *own* service.[22]

(Dr. John Muir.)

(b) Then ascending [23] his chariot, glorious [24] as the resplendent [25] sun he exclaimed [26] in the intoxication of his valour, [27] 'Who is like me [28] in fortitude, [29] courage, [30] heroism, [31] energy [32] and valour?' [33]

2. (1) ज्ञान, विद्या, विद्यावत्त्वम्, विद्वत्त्वम् (2) विशिष्यते (3) 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु । हिरण्यं द्रविणं द्युम्नमर्थैरैविभवा अपि' ॥ (4) धर्म (5) ज्ञानवत् (6) ततोऽपि (7) सर्वोत्कर्षेण वृत् (8) संसारसुख (9) समाधान, संतोष (10) त्रिलोकी (11) मनसः भाव, वृत्ति. (12) अन्वेष्टव्य, मृग्य वस्तु (13) श्रद्धा, भक्ति (14) प्रीति, प्रेमन् (15) मान्यत्वम्, पूज्यधी (16) प्रकृत्या (17) पृथङ्निर्दिष्ट, विशिष्ट (18) दया, कृपा, (19) महत्त्वम्, महिमन् (20) शुचित्वम् (21) इतर, अन्य (22) शुश्रूषा, सेवा (23) आरुह्य, आस्थाय (24) दीप्तिमत् (25) भ्राजमान (26) उच्चैर्घुष् (27) वीर्यमद, दर्प (28) मत्सम (29) स्थैर्य (30) धैर्य (31) शौर्य (32) उत्साह (33) विक्रम.

Digitized by Google

1867.

I. Translate the following passage into English :—

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकाद्गलितनयनो[3] जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिद्ददति[4] तेनासौ जीवति। अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षितुं तत्रागतः। ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तम्। कोऽयमायाति। दीर्घकर्णो गृध्रमवलोक्य सभयमाह। हा हतोऽस्मि[5]। यतः। तावद्भयस्य भेतव्यं यावद्भयमनागतम्।

आगतं च भयं वीक्ष्य नरः कुर्याद्यथोचितम्॥

ततोऽधुना संनिधाने पलायितुमक्षमः। तद्यथा भवितव्यं तद्भवतु। तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि। इत्यालोच्योपसृत्याब्रवीत्। आर्य त्वामभिवन्दे। गृध्रोऽवदत्। कस्त्वम्। सोऽवदत्। मार्जारोऽहम्। गृध्रो ब्रूते। दूरमपसर। न चेद्भन्तव्योऽसि मया। मार्जारोऽवदत्। श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः। यतः।

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित्।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत्॥

(*Hitopadesha.*)

I. (1) Hollow (2) Misfortune, adverseness of fortune (3) Eyes trickling, whose sight was dim, impaired (4) 3rd per. *plu.* pres par of दा (5) Young ones (6) I am undone.

Digitized by Google

II. Translate into Sanskrit the following passages, paying particular attention to the tenses employed :—

1. (*a*) Contentment [1] is the key of comfort. [2]

(*b*) To the wise [1] a hint [2] is sufficient. [3]

(*c*) By moderate eating [1] we escape much sickness. [2]

(*d*) In the world pleasure and pain [1] are mixed, [2] and in sweet [3] things poison can often be found.

2. (*a*) In the cold season [1] a cobbler's [2] house [3] began to burn. A poor neighbour [4] proceeded thither to warm [5] himself. Seeing the state of matters, a jester [6] said, "How astonishing [7] this is! When one person's house is burning another sits warming himself at the fire."

(*b*) Dogs [1] when together make much noise [2] and their barking [3] is a great annoyance. [4] But those people who disagree [5] among themselves, and make use of abusive language, [6] and excite [7] one another to quarrelling and violence [8] are worse [9] than dogs, as they know that such conduct is sinful.

3. (*a*) If thou criest after [1] knowledge, [2] and liftest up, thy voice for understanding, [3] if thou seekest her as silver and searchest for her as for hid treasure, [4] then shalt thou understand the fear of the Lord, and find the knowledge of God.

(*b*) Enter not into the path of the wicked, [1] and go not [2] into the way of evil men. [3]

(*c*) The wise [1] shall inherit [2] glory; [3] but shame [4] is the promotion [5] of fools. [6]

(*d*) Can a man [1] take [2] fire in his bosom, and his clothes [3] not be burned?

Digitized by Google

(*e*) Let us hear the conclusion of the whole matter : [1] fear God and keep His commandments, for this is the whole duty of man.

II. (*a*) (1) संतोष, धृति (2) सुखासादन, सुखप्रापक, सुखहेतु, सुखमूल.

(*b*) (1) चतुर (2) सूचन (3) अलम्, पर्याप्तम्.

(*c*) (1) मिताहारेण (2) व्याधिमुक्ता भू.

(*d*) (1) सुखदुःखे (2) संनिपातित (3) स्वादु.

2. (*a*) (1) शीत or शिशिर ऋतु (2) जीर्णोपानत्सेवकः (3) 'गृहं गेहोदवसितं वेश्म सद्म निकेतनम् । निशान्तपस्त्यसदनं भवनागारमन्दिरम् ॥ गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः' ॥ (4) दुर्गत, प्रातिवेश्य (5) तप् caus., वह्नि सेवय् (6) वैहासिक (7) चित्र.

(*b*) (1) 'कौलेयकः सारमेयः कुक्कुरो मृगदंशकः । शुनको भषकः श्वा स्यात्' (2) उच्चैरवं-कोलाहलं कृ, भष्, बुक्. (3) भषणम् (4) त्रासं-उद्वेगं जनय् (5) कलहं कृ (6) अधिक्षिप्, वाक्पारुष्यं कृ, शप्, अभिशप्. (7) प्रवर्तय् (8) दण्डपारुष्य, साहस (9) हीन, नीचतर.

3. (*a*) (1) अत्यादरेणान्विष् (2) ज्ञान, विद्या (3) वेदयाध्यापय वा मामिति प्रार्थयसे (4) भूमिनिखातनिधि.

(*b*) (1) खलपदं मानुविधेहि (2) मा संचर (3) कापथ, दुष्टसंचारपथिन्. 'अयनं वर्त्म मार्गोध्वपन्थानः पदवी सृतिः । सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' ॥

(*c*) (1) 'विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः । धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः ॥ धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः । दूरदर्शी दीर्घदर्शी' (2) लभ्, आप् (3) 'यशः कीर्तिः समज्ञा च' (4) अपत्रपा (5) वर्धन (6) 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः'.

(*d*) (1) 'मनुष्या मानुषा मर्त्या मनुजा मानवा नराः । स्युः पुमांसः पञ्चजनाः

Digitized by Google

पुरुषाः पूरुषा नरः' ॥ (2) धारयेत् (3) 'वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्' अदग्धवाससम् expresses the idea of the whole.

(e) (1) सर्वस्य पिण्डितार्थ, सिद्धान्त.

1868.

1. Translate into Sanskrit:—

"In a certain village there lived a Bráhman, called Yajnadatta. His wife, distressed [1] by poverty [2] said to him every day: "O thou spiritless [3] hard-hearted man! Dost thou not see that thy children are expiring from hunger? [4] How canst thou remain inactive; [5] Leave this place, and seek elsewhere, with all thy strength, the means of protecting our little ones from starvation." The Bráhman, disgusted with her continual [6] scolding, [7] made himself ready [8] and started on a long journey [9] to a distant country. After having travelled [10] for some [11] days, [12] he came into a great forest. [13] Wandering there, he became exceedingly thirsty, [14] and began to look for water with which he might quench [15] his thirst. Thus engaged, [16] he saw a great pit, [17] which had been covered with leaves, and in it a tiger, [18] a monkey, [19] a snake, [20] and a man. When the captives [21] saw him approaching, the tiger raised his voice and said: "O holy Bráhman! consider that it is exceedingly meritorious to save creatures [22] that are in danger. Therefore take me out of this pit, in order that I may return to my friends, [23] my family, and my wife." [24] The Brahman answered, "All creatures tremble even if thy name only is mentioned. Must not I, therefore, be afraid of thee, lest thou shouldst injure [25] me?"

Digitized by Google

1. (1) आंदत, आकुल (2) दुर्गति, दारिद्र्य (3) निर्वीर्य, निःसत्व (4) क्षुद्बाधा, क्षुत्पीडा (5) अव्यवसायिन्, उद्यमरहित (6) अनवरत (7) धिक्क्रिया, तिरस्कार, उपालम्भ, निन्दा (8) सज्ज, उद्यत (9) दीर्घप्रवास, चिरप्रवासमङ्गीकृत्य प्रस्था (10) अट्, पर्यट्, भ्रम् (11) कति, कतिचित् (12) Use the accusative (13) 'अटव्यरण्यं विपिनं गहनं काननं वनम्' 'महारण्यमरण्यानी' (14) उदन्या–पिपासार्दितः (15) शमय्, छिद् (16) व्यापृत (17) 'गर्तावटौ भुवि श्वभ्रे' (18) 'शार्दूलद्वीपिनौ व्याघ्रे' (19) 'कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः। मर्कटो वानरः कीशो वनौकाः' (20) 'सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः। आशीविषो विषधरश्चक्री व्यालः सरीसृपः॥ कुण्डली मूदपाचक्षुःश्रवाः काकोदरः फणी। दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः॥ उरगः पन्नगो भोगी जिह्मगः पवनाशनः। लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा॥ कुम्भीनसः फणधरो हरिर्भोगधरस्तथा'॥ (21) बन्दीकृत, बन्धनस्थित (22) 'प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' (23) 'वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्' (24) 'पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी। भार्या जायाथ पुंभूम्नि दाराः स्यात्' (25) अपकृ, पीड्, नाशय्, उपद्रु.

2. Translate the following passage into English :—

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा॥

चित्रवर्णः पृच्छति। कथमेतत्। मन्त्री कथयति। अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः। तत्र तेन मुनिना काकेन नीयमानो मूषिकशावको दृष्टः। ततः स्वभावदयात्मना तस्मान्मोचयित्वा नीवारकणैः संवर्धितः। ततो बिडालस्तं मूषिकं खादितुमनुधावति। तमवलोक्य मूषिकस्तस्य मुनेः क्रोडे प्रविवेश। ततो मुनिनोक्तम्। मूषिक त्वं मार्जारो भव। ततः स बिडालः कुक्कुरं दृष्ट्वा पलायते। ततो मुनिनोक्तम्। कुक्कुराद्बिभेषि।

Digitized by Google

त्वमेव कुक्कुरो भव । स च कुक्कुरो व्याघ्राद्बिभेति । ततस्तेन मुनिना कुक्कुरो व्याघ्रः कृतः । अथ तं व्याघ्रं मुनिर्मूषिकोऽयमिति पश्यति । अथ तं मुनिं दृष्ट्वा व्याघ्रं च सर्वे वदन्ति । अनेन मुनिना मूषिको व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रोऽचिन्तयत् । यावदनेन मुनिना स्थातव्यं तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते । मूषिक इत्यालोच्य तं मुनिं हन्तुं गतः । ततो मुनिना तज्ज्ञात्वा पुनर्मूषिको भवेत्युक्त्वा मूषिक एव कृतः । अतोऽहं ब्रवीमि नीचः श्लाघ्यपदमित्यादि । अपरं च सुकरमिदमिति न मन्तव्यम् । शृणु ।

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान् ।
अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात् ॥

2. (1) Young of a mouse (2) Lap (3) Dog (4) Bringing disgrace.

1869.

1. Translate into Sanskrit :—

(*a*) Do not destroy (*rt.* भञ्ज्) all his hopes of prosperity.

(*b*) The minister [1] has governed (*Aor. of* शास्) the country justly : [2] he is loved by all the people. [3]

(*c*) We have protected (*Aor. of* पा) you from evil or injury, and you now act the traitor [1] towards us ; [2] what could be more mournful ? [3]

(*d*) Have you made (*Aor. of* कृ) the ornaments that I told you to make ?

(*e*) Indra causes Mâtali [1] to bring (*causal*) Arjuna to heaven in his own car.

Digitized by Google

(*f*) It is fate that makes sometimes brothers and friends [1] fight (*causal*) with each other.

1. (*b*) (1) 'मन्त्री धीसचिवोऽमात्यः' (2) धर्मेण, न्यायेन, नीत्या or all these words with तस् affixed (3) सर्वेषां प्रियः, प्रीतिभाजनम्; सर्वे मन्त्रिण्यनुरागवन्तः-अनुरक्ताः-अनुरज्यन्ते.

(*c*) (1) द्रुह् (2) Use the dative (3) शोच्य, खेदजनक, शोकावह.

(*e*) (1) Use the instrumental.

(*f*) (1) Put these words in the accusative.

2. Translate into Sanskrit :—

When Râma and his brother and his wife had travelled a great distance into the forest and crossed [1] many rivers, [2] they at length saw a hermitage which was purified with the clothing [3] and garlands of devotees. [4] There they beheld Sutîkshna covered with mud [5] and his head covered with matted hair; [6] and he was without flesh [7] in consequence of his austerities, and his body was reduced to bones and skin; [8] and he was absorbed in deep meditation. [9] And Râma paid his respects, and the sage Sutîkshna embraced him, and addressed him as follows: 'O Râma, has your journey been pleasant? [10]

2. (1) तृ (2) 'अथ नदी सरित्। तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी। स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगा॥ कूलंकषा निर्झरिणी रोधोवक्रा सरस्वती'। (3) 'वल्कं वल्कलमस्त्रियाम्' (4) ऋषीणाम्. The whole may be rendered by तापसचीरमालापरिष्कृतम् (5) पङ्कधारिन् (6) जटा (7) अमांस (8) अस्थिचर्मावशेष (9) ध्यानपर, निमग्न (10) सुख, शिव, निर्विघ्न (Vide Válmiki Rámâyaṇa Araṇyakâṇḍa Ch. VII.)

3. Translate into English :—

कस्मिंश्चिदधिष्ठाने कौलिकरथकारौ प्रतिवसतः स्म। तत्र

Digitized by Google

तौ जन्मप्रभृति सहचारिणावास्ताम्। परस्परमतीव स्नेहपरौ सकलस्थानविहारिणौ सदैव कालं नयतः। अथ कदाचित्तत्राधिष्ठाने कस्मिंश्चिद्देवायतने यात्रामहोत्सवः संवृत्तः। तत्र च नटनर्तकचारणसंकुले नानादेशागतजनावृते तौ सहचरौ भ्राम्यन्तौ कांचिद्राजकन्यां करेणुकारूढां सर्वलक्षणसनाथां कञ्चुकिवर्षधरपरिवारितां देवतादर्शनाय समायातां दृष्टवन्तौ। अथासौ कौलिकस्तां दृष्ट्वा विषार्दित इव दुष्टग्रहगृहीत इव कामशरैर्हन्यमानः सहसा भूतले निपपात। अथ तं तदवस्थमवलोक्य रथकारस्तद्दुःखदुखित आप्तपुरुषैस्तं समुत्क्षिप्य स्वगृहमानाययत्। तत्र च विविधैः शीतोपचारैश्चिकित्सकोपदिष्टैर्मन्त्रवादिभिरुपचार्यमाणश्चिरात्कथंचित्सचेतनो बभूव।

3. (1) a weaver and a carpenter (2) Great rejoicing in connection with a fair (3) In the crowd of dancers, tumblers, players &c. (4) Mounted on an elephant (female) (5) Possessed of all qualities (6) Surrounded, attended, or waited upon by chamberlains and eunuchs (7) Under the influence of poison (8) As if possessed or seized by a wicked *grahu* (9) Caused him to be brought (10) Recovered senses.

4. Translate into English:—

अग्निस्तेजो महल्लोके गूढस्तिष्ठति दारुषु।
न चोपयुङ्क्ते तद्दारु यावन्नोद्दीप्यते परैः॥
स एव खलु दारुभ्यो यदा निर्मथ्य दीप्यते।
तद्दारु च वनं चान्यन्निर्दहत्याशु तेजसा॥
एवमेव कुले जाताः पावकोपमतेजसः।
क्षमावन्तो निराकारास्तिष्ठन्ति काष्ठेऽग्निरिव शेरते॥

Digitized by Google

4. (1) Does not use, consume, burn. (2) Kindled. (3) By rubbing. (4) Without an outward expression of the inward feeling.

1870.

1. Translate into Sanskrit :—

(*a*) While his two brothers sleep (*rt.* स्वप्), Hari is awake (*rt.* जागृ) and studies (*rt.* इ *with* आधि) his books.

(*b*) Whom shall I appoint (*rt.* युज् *with* नि) to the office of counsellor ?

(*c*) Observing Jamadagni alone, they discharged (*perf. of* सृज्) arrows and killed (*perf. of* हन्) him.

(*d*) At that time ninety-nine men were examined of whom fifty-four passed.

(*e*) He first makes men confide (*causal*) in him and then destroys (*caus. of* नश्) them.

(*f*) The monkeys have broken (*aor. of* भञ्ज्) the roof of the house.

1. The sentences are from the Sanskrit 2nd book and may be easily translated.

2. Translate into Sanskrit :—

So Râma departed out of Chitrakûṭa together with Sîtâ and Lakshmaṇa; and they journeyed towards the south until they came to the hermitage of the sage Atri. And Atri received [1] them with great joy; and he called to his aged wife, the virtuous [2] and devout [3] Anasûyâ, and said to her: 'Receive [4] Sîtâ, and conciliate [5] her by giving her everything that she desires.' Atri then said to Râma: 'O Sinless one, [6] this my wife is a Brâhmaṇî renowned for her vows, [7] devoted to severe mortifications, [8] and ever performing pious deeds.[9]

Digitized by Google

Regard the gentle [10] and aged Anasûyâ as your own mother, and let Sîtâ come into her presence.' [11]

2. (1) आतिथ्यमादिश् (2) पुण्यशीला, सती, साध्वी, महाभागा, साधुवृत्ता (3) तापसी (4) प्रतिगृह्णीष्व (5) सान्त्व् (6) अनघ (7) नियम, व्रत (8) उग्रेण तपसा युक्ता, उग्रतपोनिरता (9) धर्मचारिणी (10) अक्रोधना (11) अभिगच्छतु (Vide Vâlmîki Rámáyaṇa Ayodhyâkânḍa Ch. CXVII.)

3. Translate into English :—

अस्ति कस्मिंश्चिद्वनोद्देशे बहुबकसनाथो वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म । स च बकबालकानजातपक्षानपि सदैव भक्षयन्कालं नयति । अथैको बको भक्षितशिशुवैराग्यात्सरस्तीरमासाद्य बाष्पपूरप्लुतलोचनोऽधोमुखस्तिष्ठति । तं च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच । मामक किमेवं रुद्यते भवताद्य । स आह । भद्र किं करोमि । मम मन्दभाग्यस्य बालकाः कोटरनिवासिना सर्पेण भक्षिताः । दुःखितोऽहं तद्दुःखेन । तत्कथय मे यद्यस्ति कश्चिदुपायस्तद्विनाशाय । तदाकर्ण्य कुलीरकश्चिन्तयामास । अयं तावदस्मत्सहजवैरी । तथोपदेशं प्रयच्छामि सत्यानृतं यथान्येऽपि बकाः सर्वे संक्षयमायान्ति । उक्तं च ।

नवनीतसमां वाणीं कृत्वा चित्तं सुनिर्दयम् ।
तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा ॥

आह च । मामक यद्येवं तन्मत्स्यमांसशकलानि नकुलस्थं बिलद्वारात्सर्पकोटरं यावत्प्रक्षिप यथा नकुलस्तन्मार्गेण गत्वा तं दुष्टसर्पं विनाशयति । अथ तथानुष्ठिते मत्स्यमांसानुसारिणा नकु-

Digitized by Google

लेन तं कृष्णसर्पं निहत्य तेऽपि तद्वृक्षाश्रयाः सर्वे बकाश्च शनैःशनैर्भक्षिताः ॥

3. (1) Even unfledged (2) True and false (partly true &c.) (3) The word सु is used in the sense of अत्यन्त (4) Is (to be) advised (5) With (all) family (6) Mungoose.

4. Translate into English :—

यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥
क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् ।
क्षेत्रबीजसमायोगात्ततः सस्यं समृध्यते ॥
कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च ॥
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् ॥

4. (1) Sown (2) Effort, action on the part of man (3) Fruit corn (4) Arriving at the fruit (5) Doer.

1871.

1. Translate into Sanskrit :—

(*a*) Fair damsel, do not fear your father, who, though he comes to know all about the affair, will not be sorry.

(*b*) You appear to be slow to recognise me.

(*c*) Alas! what should I do? where shall I go? how shall I appear before my lord without the child?

(*d*) They threw themselves into an ocean of sorrow.

(*e*) I was received with hospitality.

Digitized by Google

N.B.—Use verbs, and not perfect passive participles, in translating into Sanskrit throughout this paper.

1. (*a*) भीरु-सुभु! अलं गुरुजनभयेन। दृष्ट्वा ते विदितधर्मा तत्रभवान्नात्र दोषं ग्रहीष्यति।

(*b*) प्रत्यभिज्ञानमन्थरो दृश्यसे।

(*c*) हा धिक्। किं करोमि। क्व गच्छामि। कथं भर्तुरमे बालं विना तिष्ठामि।

(*d*) ते दुःखसागर आत्मानं चिक्षिपुः।

(*e*) अहमातिथेयेन सत्कारेणोपाचर्यें।

2. Translate into Sanskrit:—

My heart! be calm, be calm. What is the use of this desire that is not to be fulfilled? Besides, he, at whose sight thou art so much perturbed, does not exist. Alas! Oh shame! how foolish thou art that thou still wishest to see that man alone! Oh heart! dost not thou feel ashamed to have given up this man with whom thou hast been brought up since thy birth, and to follow him whom thou sawest only for a moment? Or why should I blame thee! Thou art afraid of the arrows of the bodiless Cupid, and art thereby engaged in this folly. So let it be. Let me then censure the bodiless one. Flower-weaponed Lord, having conquered all the Gods and the Asuras, art thou not ashamed to strike a poor woman? But what is this here? Alas! I am unfortunate on all sides, and this prodigy portends that nothing but death is at hand.

2. हृदय प्रसीद प्रसीद। किमनेन दुर्लभजनप्रार्थनानुबन्धेन। अन्यच्च येनैव दृष्टेनेदृशस्ते संतापो वर्धते (सविस्मयम्) [स नास्त्येव] । [हा धिक्] । पुनरपि तमेव प्रेक्षितुमभिलषसीत्यहो ते मूढता। हृदय जन्मतः प्रभृति सहसंवर्धितमेनं जनं

Digitized by Google

परित्यज्य क्षणमात्रदर्शनपरिचितं जनमनुगच्छन्न लज्जसे । अथवा कस्ते दोषः । अनङ्गशरपतनभीतेन त्वयैवं व्यवसितम् । भवतु तावत् । अनङ्गं तावदुपालप्स्ये । भगवन् कुसुमायुध निर्जितसकलसुरासुरो भूत्वा स्त्रीजनं प्रहरन्कथं न लज्जसे । (विचिन्त्य) (किमेतत्) सर्वथा मम मन्दभागिन्या अनेन दुर्निमित्तेनावश्यं मरणमुपस्थितम् । [Vide Ratnâvali Act II.]

3. Translate into English :—

(a) देव कस्मिंश्चिद्वनोद्देशे चण्डकर्मा नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमताटव्यां कश्चिद्ब्राह्मणः समासादितः । ततस्तस्य स्कन्धमारुह्य प्रोवाच । भो अग्रेसरो गम्यताम् । ब्राह्मणोऽपि भयत्रस्तमनास्तमादाय प्रस्थितः । अथ तस्य कमलोदरकोमलौ पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत् । भोः किमेवंविधौ ते पादावतिकोमलौ । राक्षस आह । भो व्रतमस्ति । नाहमार्द्रपादो भूमिं स्पृशामि । ततस्तच्छ्रुत्वात्मनो मोक्षोपायं चिन्तयंस्तत्सरः प्राप्तः । ततो राक्षसेनाभिहितम् । भो यावदहं स्नानं कृत्वा देवतार्चनविधिं विधायागच्छामि तावत्त्वयातः स्थानान्नान्यत्र गन्तव्यम् । तथानुष्ठिते द्विजश्चिन्तयामास । नूनं देवतार्चनविधेरूर्ध्वं[1] मामेष भक्षयिष्यति । तद्ददूततरं गच्छामि येनैष आर्द्रपादो न मम पृष्ठमेष्यति[2] । तथानुष्ठिते राक्षसो व्रतभङ्गभयात्तस्य पृष्ठं न गतः । अतोऽहं ब्रवीमि ।

प्रच्छन्नेन सदा भाव्यं पुरुषेण विजानता[3] ।
राक्षसेन्द्रगृहीतोऽपि प्रज्ञान्मुक्तो द्विजः पुरा ॥

(b) प्रजानां धर्मषड्भागो राज्ञो भवति रक्षितुः ।
अधर्मादपि षड्भागो जायते यो न रक्षति ॥

Digitized by Google

प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते ॥
राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च सर्वेषां न्यायवर्तिनाम् ॥
फलार्थी पार्थिवो लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोऽङ्कुरानिव ॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥

(c) विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुतभुजाहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ॥

3. (a) (1) After (2) Follow, go after me (3) A knowing man, an intelligent man should be an asker, i. e. an intelligent man should always be inquiring, should make enquiries.

(b) (1) As a gardener preserves, takes care of young sprouts, germs.

(c) (1) Continual (volumes) of smoke (2) Circle of flames (3) Having as much heat as the fire at the time of the destruction of the universe has.

1872.

1. Translate into English :—

अस्ति कस्मिंश्चिदधिष्ठाने तपोवने शालङ्कायनो नाम तपोधनो जाह्नव्यां स्नानार्थं गतः । तस्य च सूर्योपस्थानं कुर्वत-

Digitized by Google

स्तत्र प्रदेशे मूषिका काचित्खरतरनखाग्रपुटेन श्येनेने[3] गृहीता। तां दृष्ट्वा स मुनिः करुणार्द्रहृदयो मुञ्चमुञ्चेति कुर्वाणस्तस्य पाषाणखण्डं प्राक्षिपत्। सोऽपि पाषाणखण्डप्रहारव्याकुलेन्द्रियो भ्रष्टमूषिके[4]को भूमौ निपपात। मूषिकापि भयत्रस्ता कर्तव्यमजानती रक्षरक्षेति जल्पन्ती मुनिचरणान्तिकमुपाविशत्। श्येनेनापि चेतनां लब्ध्वा मुनिरुक्तः। यद्भो मुने न युक्तमनुष्ठितं भवता यदहं पाषाणेन ताडितः। किं त्वमधर्मान्न बिभेषि। तत्समर्पय ममैतां मूषिकाम्। नो चेत्प्रभूतं पातकमवाप्स्यसि। इति ब्रुवाणं श्येनं प्रोवाच सः। भो विहङ्गाधम रक्षणीयाः प्राणिनां प्राणा, दण्डनीया दुष्टाः, संमाननीयाः साधवः, पूजनीया गुरवः, स्तुत्या देवाः। तत्किमसंबद्धं प्रजल्पसि। श्येन आह। मुने न त्वं सूक्ष्मधर्मं वेत्सि। इह हि सर्वेषां प्राणिनां विधिना सृष्टिं कुर्वताहारोऽपि विनिर्मितः। ततो यथा भवतामन्नं तथास्माकं मूषिकादयो विहिताः। तत्स्वाहारकाङ्क्षिणं मां किं दूषयसि।

1. (1) Serving, waiting upon, worshipping the sun. (2) A hawk (3) A Bahuvrihi compound : one who has let the mouse go, escape. (4) Delicate points of &c. (5) Destined, appointed.

2. Translate into English :—

(*a*) अप्रियस्यापि वचसः परिणामेऽविरोधिनः[5]।
वक्ता श्रोता च यत्रास्ति रमन्ते तत्र संपदः॥

(*b*) गुणेन स्पृहणीयः स्यान्न रूपेण युतो नरः।
सौगन्ध्यहीनं नादेयं पुष्पं कान्तमपि क्वचित्॥

Digitized by Google

(*c*) तृष्णां छिन्द्धि, भज क्षमां, जहि मदं, पापे रतिं मा कृथाः,
सत्यं ब्रूह्यनुयाहि साधुपदवीं, सेवस्व विद्वज्जनान् ।
मान्यान्मानय, विद्विषोऽप्यनुनय, प्रच्छादय स्वान्गुणान्
कीर्तिं पालय, दुःखिते कुरु दयामेतत्सतां चेष्टितम् ॥

2. (1) Without inconsistency, ill or bad consequence in the end. (2) Imper. 2nd pers. sing par. of हन्.

3. Translate into Sanskrit :—

(*a*) While at midnight [1] all men sleep, Hari is awake and studies his books.

(*b*) They asked (*perf.* of प्रच्छ्) [2] him the purpose of his visit.

(*c*) At that time ninety-nine men were examined of whom fifty-four passed.

(*d*) He has not been able (*aor.* of शक्) to convince me that my belief in the existence of ghosts is unfounded.

(*e*) The enemies have burned (*aor.* of दह्) twenty villages, and are now marching against the capital.

(*f*) Vasishtha caused Das'aratha to perform a sacrifice.

3. (1) 'अर्धरात्रनिशीथौ द्वौ' (2) Does not take *samprasâraṇa* in the perfect.

4. Translate into Sanskrit :—

A dervise [1] was journeying alone in a desert, when two merchants [2] suddenly met him. [3] 'You have lost a camel,' [4] said he to the merchants. 'Indeed we have,' they replied 'Was he not blind in his right eye, [5] and lame in his left leg'? [6] said the dervise. 'He was,' replied the merchants. 'Had he not lost a front [7] tooth'? [8] said the dervise. 'He had,' rejoined the merchants. 'And was he not loaded with honey on one side, [9] and grain on the other'? 'Most cer-

Digitized by Google

tainly he was,' they replied; 'and as you have seen him so lately, [10] and marked him [11] so particularly, [12] you can in all probability [13] conduct us unto him.'

4. (1) तुरुष्कदेशीयो यतिः, भिक्षुः (2) 'वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् । पण्याजीवो ह्यापणिकः' श्रेष्ठिन्, व्यवहारिन् (3) स संगतो बभूव ताभ्याम् (4) 'उष्ट्रे क्रमेलकमयमहाङ्गाः' (5) (6) Use the instrumental. 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । दृग्दृष्टी'. 'पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्' (7) अग्र, पुरोवर्तिन् (8) 'रदना दशना दन्ता रदाः' (9) एकपार्श्वे मधुभारं वह् (10) प्रत्यग्रम् (11) निरूप्, निर्ध्ये (12) विशेषेण, विशेषतः (13) प्रायस्, प्रायशः.

1873.

1. Translate into English :—

(*a*) अस्ति धरातले महोदयं नाम नगरम् । तत्र राजा देवशक्तिर्नाम । तस्य पुत्रो गुणशक्तिर्नाम । स महतोदरस्थेन रोगेण प्रतिदिनं क्षयमुपनीयते । अथानेकप्रकारैः सद्वैद्यैः सच्छास्त्रोपदिष्टौषधयुक्त्यापि चिकित्स्यमानो न स्वास्थ्यमाप्नोति । तदातिनिर्वेदात्स राजपुत्रो देशान्तरं प्रयातः । काश्मीरनगरे देवसेनो नाम राजा प्रतिवसति । तस्य द्वे पुत्र्यौ यौवनसंपन्ने तिष्ठतः । ते च प्रतिदिनमादित्योदये पितुः सकाशमागत्य नमस्कारं चक्रतुः । तत्र चैकाब्रवीत् । विजयी महाराजो यस्य प्रसादात्सर्वं सुखं लभ्यते । द्वितीयाब्रवीत् । महाराज विहितं भुज्यते । अथ तस्यास्तद्वचनं श्रुत्वा राजा सामर्षमाह । भो मन्त्रिण एषा दुष्टकुमारिका कस्यचिद्वैदेशिकस्य रोगिणो दरिद्रहतकस्य सकाशादुद्वाह्यतां येन विहितं भुङ्क्ते । अथ मन्त्रिणो

Digitized by Google

राज्ञस्तद्वचनमाकर्ण्य तस्य राजपुत्रस्य रोगिणो भिक्षावृत्तेस्तां कन्यां विवाह्यार्पयामासुः । सा च तमादाय महाभक्त्या देववत्पतिचरन्त्यन्यविषयं गता । अथ कस्मिंश्चिन्नगरप्रवेशे तडागसमीपे वृक्षाधस्तात्तं मुक्त्वा घृतलवणतैलतण्डुलेन्धनसाधनार्थं नगरमध्ये गता । तद्भोजनोपकरणं गृहीत्वा यावदागच्छति तावत्स राजपुत्रः प्रसुप्तः । तस्य मुखान्निर्गत्य सर्पः फणां निष्क्रार्म्य वायुमश्नाति । अथ तत्प्रत्यासन्नवल्मीकेऽन्यः सर्पस्तथैवास्ते ।

(b) ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते जन्तुः ॥

(c) अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ।
गणयति न तिरस्कारं दानान्धविलोचनो नीचः ॥

(d) अस्यां सखे बधिरलोकनिवासभूम्यां
किं कूजितेन किल कोकिल कोमलेन ।
एते हि दैवहतकास्तदभिन्नवर्णं
त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥

(e) मुखं तस्याः स्मितस्मेरं किंचिदञ्चलसंवृतम् ।
मदालोकनलोलाक्षं स्मृत्वा मन्ये सुधां मुधा ॥

1. (a) (1) Treated (2) That which is allotted as one's portion (by fate), is got or enjoyed by him (3) Said angrily (4) A foreigner (5) Wretched, poor (6) Let some.....one marry her or let her be married to such a one. (7) Who maintained himself by begging (8) Extending and stretching out its hood (9) An ant-hill.

(b) (1) Trimmed, the fuel in which is moved (2) Hurt (3) When provoked, from provocation.

(c) (1) By the ear.

Digitized by Google

(*d*) (1) Place of residence of deaf men (2) Warbling, sweet notes (3) Having a colour not different from that of him (the crow). This is an *Anyokti*.

(*e*) (1) Pleasing on account of a smile (2) A little or somewhat covered by the skirt of a garment. (3) Whose eyes are eager to see me (4) In vain, useless.

2. Translate into Sanskrit :—

(*a*) On one occasion the sage was going from their cottage in a great hurry. The nymph asked him where he was going. [1] "The day," he replied, "is drawing fast to a close, [2] I must perform the Sandhyâ-worship or a duty will be neglected. [3] The nymph smiled mirthfully [4] as she rejoined, "Why do you talk, grave Sir, [5] of this day drawing to a close; your day is a day of many years, [6] a day that must be a marvel to all; explain what this means." The Muni said, "Fair damsel, [7] you came to the river-side at dawn; I beheld you then, and you then entered my hermitage. It is now the revolution of evening, [8] and the day is gone. What is the meaning of this laughter? Tell me the truth." Pramlochâ answered, "You say rightly, Venerable Brâhman, that I came hither at morning dawn, but several hundred years [9] have passed [10] since the time of my arrival. This is the truth.

(*b*) I do not like your giving Dakshiṇâ [1] to men who are not Brâhmans.

God is not inaccessible [2] to the human intellect.

What avails your crying aloud. [3]

My heart was grieved [4] to see [5] so good a man in such adversity.

Better to roam in forests with wild beasts than live in places in the company of fools. [6]

Digitized by Google

2. (*a*) (1) त्वं कुत्र गच्छसि, भगवन् कुत्र गच्छति भवान् इति. The student must remember that there is no indirect construction in Sanskrit. The words should be translated as in the direct form and should be used with इति (2) दिनान्तः-सायाह्नः प्राप्तः-आसन्नः, संध्योपस्थिता, दिवसात्ययो जातः (3) अन्यथा धर्मलोपो भवेत्-भविष्यति (4) सविलासम्, सविभ्रमम्. (5) भगवन् (6) बहुभिर्वत्सरैस्तव दिवसो भवति (7) सुन्दरि (8) संध्याप्रवृत्ति, संध्यापर्याय, आगमन. (9) वर्षाणां शतानि (10) व्यतीयुः

(*b*) (1) अब्राह्मणेभ्यो दक्षिणादानं न मे रोचते (2) नाविषयः (3) किं ते उच्चैराक्रोशेन-रोदनेन-आक्रन्दितेन (4) उद्विज्, निर्विद् (5) दृष्ट्वा (6) वरं गहनेषु भ्रान्तं वनचरैः, न मूर्खजनसंपर्कस्थानेषु वसतिः

1874.

1. Translate into English :—

(*a*) कश्चिद्धनदत्तो धनहीन इतस्ततः परिभ्रमंश्चन्दनपुरनिवासिनो दयायुक्तस्य हिरण्यगुप्तस्य गृहमागतः । तं तथाविधमवलोक्य स तं पप्रच्छ । को भवान् । किमर्थमत्रागतोऽसि । पृष्टो वृत्तान्तमखिलमेवायमकथयत् । तच्छ्रुत्वा तेनापुत्रेण हिरण्यगुप्तेन रत्नावती नाम कन्या तस्मै विवाहेन दत्ता । तत्र तया समयसौ धनदत्तो विविधसुखमनुभवंस्तिष्ठति । अथ कियत्यपि काले गते श्वशुरमब्रवीत् । तातानुज्ञापय । स्वदेशं गच्छामि । तदादिष्टो नानारत्नसमेतदासीद्वयं प्राप्य रत्नावत्या सालंकारया स्वदेशं गच्छन्गहनाटवीं प्रविवेश । तत्र कूपमासाद्य तां पतिव्रतां सखीद्वयसहितां निहत्य सर्वालंकारमादाय स पापिष्ठोऽभिलषितस्वदेशं जगाम । ततो रत्नावती परमायुर्वशात्कथमपि जीवितवती, सख्यौ मृतवत्यौ । अनन्तरं विधिवशाद्बहवोऽध्वनीनास्तृष्णा-

Digitized by Google

र्ताः कूपसमीपमागत्य तामालोक्य विस्मिताः पप्रच्छुः। भद्रे किमेतत्। पृष्टा सा ब्रूते धर्मशीला। अस्मिन्नरण्ये चौरेण ममाभरणं गृहीत्वा मामपि निहत्य गतम्। तद्भयान्मे पतिः कुत्र गत इति न जाने।

(*b*) जवो हि संज्ञेः परमं विभूषणं,
त्रपाङ्गनायाः, कृशता तपस्विनः।
द्विजस्य विद्या, नृपतेरपि क्षमा,
पराक्रमः शस्त्रबलोपजीविनाम्॥
रविर्मणिरपि निश्चेष्टैः पादैस्तिग्मद्युतेर्मनाक्स्पृष्टैः।
ज्वलतितरामिति को वा मन्युं सोढुं क्षमो मानी॥
आयातो भवतः पितेति सहसा मातुर्निशम्योदितं
धूलीधूसरितो विहाय शिशुभिः क्रीडारसान्प्रस्तुतान्।
दूरात्स्मेरमुखः प्रसार्य ललितं बाहुद्वयं बालको
नाधन्यस्य पुरः समेति परया प्रीत्या रटद्वर्धरम्॥

1. (*a*) (1) Travellers.

(*b*) (1) Of a horse (2) The सूर्यकान्त, a prism, lens (3) Without action, inanimate. (4) The word पाद in the verse is used in a double sense–in the sense of rays and feet. (5) Of the Sun. (6) A little touched. (7) तराम् shows excess. (8) Words uttered (9) Smutted with dust. (10) Commenced (11) Having a smiling face (12) Lisping. [A boy does not run towards an unfortunate man. i. e. He before whom a boy runs &c. &c. is fortunate.]

2. Translate into Sanskrit :—

A wolf [1] at the point of death [2] reviewed [3] his past life. [4] "I must," said he, "acknowledge [5] that I have been wicked, [6] but not the very worst. [7] I have committed many bad ac-

Digitized by Google

tions; that I cannot deny; [8] but I have likewise done much good. Once when a bleating [9] lamb, who had strayed [10] from his flock, approached so near to me that I could have easily devoured it, I spared [11] it. About the same time I bore with patience [12] the invectives [13] of a sheep, [14] although I had nothing to fear from the dogs." "Yes," replied a fox, "I was witness to all this; I remember well [15] the circumstance [16] it took place at the time when you had a bone [17] sticking in your throat [18] which the crane [19] pulled out for you.

2. (1) 'कोकस्त्वीहामृगो वृकः' (2) मुमूर्षु, आसन्नमृत्यु, मृत्युवशवर्तिन् &c. (3) स्मृ, आध्यै (4) अतीत, अतिक्रान्तचरितानि (5) अङ्गीकृ (6) दुष्टाशय (7) पापिष्ठ (8) प्रत्याख्या (9) रु (10) भ्रष्ट, परिभ्रष्ट (11) रक्ष् (12) तितिक्ष्, सह् (13) परिभाषण, निन्दा (14) 'मेद्रोरभ्रोरणोर्णायुमेषवृष्णय एडके' (15) बाढं स्मरामि (16) वृत्त (17) 'कीकसं कुल्यमस्थि च' (18) कण्ठ, गल (19) बक, कङ्क.

1875.

1. Translate into English :—

(a) अन्येद्युः कंचन बालकमुरसि दधती वसुमती वल्लभमभिगता तेन कुत्रत्योऽसाविति पृष्टा समभाषत। राजन्नतीतायां रात्रौ काचन दिव्यवनिता मत्पुरतः कुमारमेकं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताब्रवीत्। देवि त्वन्मन्त्रिणो धर्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकान्ताहं तारावली नाम, नन्दिनी मणिभद्रस्य, यक्षेश्वरानुमत्या मदात्मजमेनं भवत्तनुजस्य विशुद्धयशोनिधे राजवाहनस्य परिचर्याकरणायानीतवत्यस्मि। त्वमेनं मनोजसंनिभमभिवर्धयेति। विस्मयविकसितनयनया मया सविनयं सत्कृता स्वर्क्षी यक्षी साथादृश्यतामया-

Digitized by Google

सीदिति । कामपालस्य यक्षकन्यासंगमे विस्मयमानमानसो राजहंसः सुमित्रमाहूय तदीयभ्रातृपुत्रमर्थपालनामानं विधाय तस्मै सर्ववार्तादिकं व्याख्यायादात् ।

(*b*) दृष्ट्वा स्फीतोऽभवदलिरसौ लेख्यपद्मं विशालं
चित्रं चित्रं किमिति किमिति व्याहरन्निष्पपात ।
नास्मिन्गन्धो न च मधुकणा नास्ति तत्सौकुमार्यं
घूर्णन्मूर्ध्ना बत नतशिरा व्रीडया निर्जगाम ॥
(*c*) छाया संश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं
मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह ।
आचामत्यहिमांशुदीधितिरपस्तप्तेव लोकैः समं
निद्रा गर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः ॥

1. (*a*) A proper name (2) Whence, from what place (3) Past, gone, gone by, last (4) Closed, overpowered by sleep (5) Awakening (6) With the consent of Kubera (7) Like Cupid (8) Having good eyes (9) Disappeared.

(*b*) (1) Swollen, overjoyed, delighted (2) A lotus drawn in a picture (3) Hanging his head.

2. Translate into Sanskrit :—

Two travellers, [1] seeing before them a great forest, promised [2] to help each other if they should meet with any danger. [3] They had not gone far when a tiger came rushing towards them [4] out of a thicket; [5] upon which one, being a light nimble fellow, [6] got up into a tree; the other falling flat upon his face, [7] and holding his breath, [8] lay still while the tiger came up and smelled at him: but that creature, supposing him to be a dead carcass, [9] went back again into

Digitized by Google

the wood, without doing him the least harm. Then he who had climbed the tree came down to his companion, and with a pleasant smile [10] asked him what the tiger said to him. "For," says he, "I saw that he put his mouth [11] very close to your ear. [12] "He told me," said the other, "to take care for the future not to put any confidence in such cowards as you."

2. (1) 'अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि' (2) प्रतिश्र (3) भयहेतु (4) रभसात्, वेगेन गम्, निष्पत् (5) गुल्म (6) लघूत्थान, उत्थानयोग्य, चपल (7) अवाङ्मुख (8) प्राणानायम्य (9) 'कुणपः शवमस्त्रि-याम्' (10) सरुचिरस्मितम् (11) 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' (12) 'कर्णशब्दमहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः'

1876.

1. Translate into Sanskrit:—

(*a*) May the queen and her descendants rule (*pot. of* शास्) us long.

(*b*) Râma questioned (*imper. of* युज् *with* अनु) him how much wealth he wanted. [1]

(*c*) Then a battle took place (*perf. of* पद् *with* समा) and the gods killed (*perf. of* हन्,) them.

(*d*) They began to excavate the hill, and effected it after many days (अहन्).

(*e*) The doctor has directed me to take this medicine for forty-two days.

(*f*) He embraced (*aor. of* श्लिष्) his child and wept (*aor. of* रुद्) bitterly.

1. (*b*) (1) Do not use the indirect construction.

Digitized by Google

2. Translate into Sanskrit :—

The frogs [1] saw their marsh [2] had become, one hot summer [3] completely dry. 'Where shall we betake ourselves?' they exclaimed. 'Into the well,' [4] said one of the youngest of them, 'which we perceive is quite near to us. The water is only two inches [5] from the brink. It will, therefore, be easy for us to leap in, and we shall find it very comfortable.' 'True,' replied one of the elder ones, 'but when the water sinks down, and we find ourselves at the bottom, which is at least twenty feet from the mouth [6] shall we come out as easily as we went in? I am of opinion that we cannot expose ourselves to such danger without the utmost imprudence.' [7]

2. (1) 'भेके मण्डूकवर्षाभूशाद्वरम्रवददुर्दुराः' (2) कच्छ, अनूपभूः (3) निदाघकाल, ग्रीष्म (4) 'पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा' (5) अङ्गुलि (6) वीनाह (7) अविमृश्यकारित्वम्.

3. Translate into English :—

कस्मिंश्चिद्वनोद्देशे सिंहदंपती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयमजीजनत्। सिंहोऽपि नित्यमेव मृगान्व्यापाद्य सिंह्यै ददाति। अथ कदाचित्तेन किमपि नासादितम्। वने भ्रमतोऽपि तस्य रविरस्तंगतः। अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः। स च बालकोऽयमिति मत्वा यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमपि समर्पितवान्। ततः सिंह्याभिहितम्। भोः कान्ताप्यानीतं किंचिदस्माकं भोजनम्। सिंह आह। प्रिये मयाद्यैनं शृगालशिशुं परित्यज्य न किंचित्सत्त्वमासादितम् स च मया बालोऽयमिति मत्वा न व्यापादितः। इदानीमेनं भक्षयित्वा पथ्यं कुरु। प्रभातेऽन्यदुपार्जयिष्यामि। साह। भोः कान्त त्वया

Digitized by Google

बालकोऽयमिति मत्वा न व्यापादितस्तदहं कथं स्वोदरार्थे व्यापादयामि । उक्तं च ।

अकृत्यं नैव कृत्यं स्यात्प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं विमुञ्चेत एष धर्मः सनातनः ॥

तस्मान्ममायं तृतीयः पुत्रो भविष्यतीत्युक्त्वा तमपि स्वस्तनक्षीरेण पुष्टिमनयत् । एवं ते त्रयोऽपि शिशवः परस्परमज्ञातजातिविशेषा एकत्र विहारिणो बाल्यमतिवाहयन्ति ।

3. Does not require any notes.

4. Translate into English :—

(*a*) उदेति[1] सविता ताम्रस्ताम्र एवास्तमेति[2] च ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥

(*b*) तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणाम् ।
सतां हि साधुशीलत्वात्स्वभावो न निवर्तते ॥

(*c*) येऽमी ते मुकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदा-
स्ते भ्राम्यन्ति फलाद्बहिर्विहरतो दृष्ट्वा न संभाषसे ।
ये कीटास्तव दृक्पथं च न गतास्ते त्वत्फलाभ्यन्तरे
धिक्कां चूत यतः परापरपरिज्ञानानभिज्ञो भवान् ॥

4. (*a*) (1) Rises (2) Sets. The verse points to the well known phenomenon of everyday occurrence of the sun's red colour at rising and setting.

(*c*) (1) Ever since the time of budding (2) Bees (3) You did not see.

Digitized by Google

1877.

1. Translate :—

मकर आह। कथमेतत्। सोऽब्रवीत्। अस्ति कस्मिंश्चिद्वनोद्देशे महाचतुरको नाम शृगालः। तेन कदाचिदरण्ये स्वयंमृतो गजः समासादितः। तस्य समन्तात्परिभ्रमति। परं कठिनां त्वचं भेत्तुं न शक्नोति। अथात्रावसर इतश्चेतश्च विचरन्कश्चित्सिंहस्तत्रैव प्रदेशे समाययौ। अथ समागतं दृष्ट्वा स क्षितितलविन्यस्तमौलिमण्डलः संयोजितकरयुगलः सविनयमुवाच। स्वामिन्, त्वदीयोऽहं लागुडिकः स्थितस्त्वदर्थे गजमिमं रक्षामि। तदेनं भक्षयतु स्वामी। तं प्रणतं दृष्ट्वा सिंहः प्राह। भो नाहमन्येन हतं सत्वं कदाचिदपि भक्षयामि। उक्तं च।

वनेऽपि सिंहा मृगमांसभुक्ता
बुभुक्षिता नैव तृणं चरन्ति।
एवं कुलीना व्यसनाभिभूता
न नीतिमार्गं परिलङ्घयन्ति॥

तत्तत्रैव गजोऽयं मया प्रसादीकृतः। तच्छ्रुत्वा शृगालः सानन्दमाह। युक्तमिदं स्वामिनो निजभृत्येषु। उक्तं च यतः

अन्त्यावस्थागतोऽपि महान् स्वगुणान्नजहाति न शुद्धतया।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तमुक्तोऽपि॥

(1) Got, met with, found (2) तस्मिन्नेव प्रदेशे, In that very place (3) He who had placed his head on the surface of the ground, he who had touched the ground with his head by way of obeisance. (4) Joined or folded his hands (pair) (5) Mace or club bearer (6) Who have eaten the flesh of deer (7) A peacock.

Digitized by Google

2. Translate :—

(*a*) उत्तमो नातिवक्ता स्यादधमो बहुभाषकः ।
नहि स्वर्णे ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते ॥

(*b*) उत्तुङ्गशैलशिखरास्थितपादपस्य
काकः कृशोऽपि फलमालभते सपक्षः ।
सिंहः प्रचण्डगजकुम्भविदारकोऽपि
उच्छिष्टमेव लभते खलु पक्षहीनः ॥

(*c*) एकस्मिन्यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तत्र पुण्यप्रदो वधः ॥

2. (*a*) (1) Gold (2) Bell-metal.

(*b*) (1) The word is used in a double sense (1) With wings (2) with a partisan, assisted, aided by another. (2) Used similarly in the sense of (1) Without wings (2) without any one to assist &c.

3. Translate into Sanskrit :—

A certain goblin [1] used to keep watch over [2] a rich treasure buried underground. Suddenly, he was ordered by the ruler of the demons to fly away and remain for many years [3] in another country. Wondering how his treasure might be safe in his absence, [4] he at last hit upon a plan. [5] In that city there lived a miser. To him the goblin, having dug up the treasure, gave it saying, "I give you this from my great love for you. With its help you must eat, drink and be merry." Then the goblin flew away. Ten-twenty years went by. Having completed [6] his service, the goblin flies home to his native land. What does he see? Oh rapturous sight! The miser, dead from starvation, [7] lies stretched

Digitized by Google

on the treasure chest [8] and the treasure is all there untouched. So the goblin gets his treasure back again, and rejoices greatly to think that it has had a guardian who did not cost him anything.

3. (1) भूत, पिशाच, यक्ष (2) रक्ष् (3) Use the accusative (4) मयि गते कथं मम निधिरजातापायो, निर्भयः, सुरक्षितः, सुस्थो वा भवेत् &c. (5) तस्मै मा, प्रतिभा (6) समाप्य (7) प्रायोपवेशन, अनशन (8) पेटिका, मञ्जूषा, वञ्चरिका.

1878.

1. Translate into English :—

अस्ति कस्मिंश्चिद्वृक्षे पुराहं वसामि। तत्राधस्तात्कोटरे कपिञ्जलो नाम चटकः प्रतिवसति स्म। अथ सदैवास्तमनवेलायामागतयोर्द्वयोरनेकसुभाषितगोष्ठ्या देवर्षिब्रह्मर्षिराजर्षिपुराणचरितकीर्तनेन च पर्यटनैर्दृष्टानेककौतूहलप्रकथनेन च परमसुखमनुभवतोः कालो व्रजति। अथ कदाचित्कपिञ्जलः प्राणयात्रार्थमन्यैश्चटकैः सहान्यं पक्वशालिप्रायं देशं गतः। ततो यावन्निशासमयेऽपि नायाति तावदहं सोद्वेगमनास्तद्वियोगदुःखितश्चिन्तयामि। अहो किमद्य कपिञ्जलो नायातः। किं केनापि पाशेन बद्धः उताहोस्वित्केनापि व्यापादितः। सर्वथा यदि कुशली भवति तन्मां विना न तिष्ठति। एवं मे चिन्तयतो बहून्यहानि व्यतिक्रान्तानि। ततश्च तत्र कोटरे कदाचिच्छीघ्रगो नाम शशकोऽस्तमनवेलायामागत्य प्रविष्टो मयापि कपिञ्जलनिराशत्वेन न निवारितः। अथान्यस्मिन्नहनि कपिञ्जलः शालिभक्ष-

Digitized by Google

णादतीव पीवरतनुः स्वमाश्रयं स्मृत्वा भूयोऽपि तत्रैव समायातः ।
अथवा साध्विदमुच्यते ।

न तादृग्जायते सौख्यमपि स्वर्गे शरीरिणाम् ।
दरिद्रेऽपि हि यादृक्स्यात् स्वदेशे स्वपुरे गृहे ॥

(1) Hollow of a tree (2) Cock-sparrow (3) Time of sunset (4) Telling each other or giving an account to each other of strange things seen in their wanderings (5) To gain a livelihood (6) Rice (7) I, whose mind was troubled. (8) Fat.

2. Translate into English :—

(*a*) जीवन्नेव मृतोऽसौ यस्य जनो वीक्ष्य वदनमन्योन्यम् ।
कृतमुखभङ्गो दूरात्करोति निर्देशमङ्गुल्या ॥

(*b*) वसन्त्यरण्येषु चरन्ति दूर्वां
पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणा नराणां
को लोकमाराधयितुं समर्थः ॥

(*c*) परार्थे यः पीडामनुभवति, भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ।
न संप्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः ॥

2. (*a*) (1) Turning away, aside, their faces (2) Points to him with their fingers from a distance.

(*b*) (1) Not the property of any one individual.

(*c*) (1) A desert devoid of properties (rendering it fertile.)

3. Translate into Sanskrit :—

In the kingdom over which S'antanu ruled there was

Digitized by Google

no rain for twelve years. Apprehensive that the country would become a desert the king assembled the Bráhmans, and asked them why no rain fell and what fault he had committed. They told him that he was as it were a younger brother married before an elder, [1] for he was in the enjoyment of the earth which by right[2] belonged to his elder brother Devâpi. "What then am I to do?" said the Râjâ; to which they replied, "Until the gods shall be displeased with Devâpi, by his declining [3] from the path of righteousness, [4] the kingdom is his, and to him therefore you should resign [5] it.

3. (1) परिवेत्तृ (2) न्यायेन (3) चलन, च्यवन (4) धर्मपथ (5) अर्, समर्.

GRAMMAR, IDIOM, ETYMOLOGY AND TRANSLATION.

1879.

1. Translate into English :—

(*a*) आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥

(*b*) गीर्भिगुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥

(*c*) कदाचिद्राजा बहिरुद्यानं मध्येमार्गं प्रत्यागच्छन्तं क-

Digitized by Google

मपि विप्रं ददर्श। तस्य करे चर्ममयं कमण्डलुं वीक्ष्य तं चातिदरिद्रं ज्ञात्वा मुखश्रिया विराजमानं चावलोक्य तुरङ्गं तदग्रे निधायाह। विप्र चर्मपात्रं किमर्थं पाणौ वहसीति। स च विप्रो नूनं मुखशोभया मृदूक्त्या च भोज इति विचार्याह। देव वदान्यैशिरोमणौ भोजे पृथ्वीं शासति लोहताम्राभावः समजनि। तेन चर्ममयं पात्रं वहामीति। राजाह। भोजे शासति लोहताम्राभावे को हेतुः। तदा विप्रः पठति—

अस्य श्रीभोजराजस्य द्वयमेव सुदुर्लभम्।
शत्रूणां शृङ्खलैर्लोहं ताम्रं शासनपत्रकैः॥

1. (1) An adj. of खलसमागमः. It means— which is a wild conflagration to the deer of joy : what wild fire is to a deer खलसमागम is to आनन्द. i.e. that which mars all joy or pleasure. (2) Which is an elephant in rut to the tree of शील. (3) Which is strong wind to the lamp of knowledge. (4) Containing harsh language. (5) Touch-stone. (6) Rubbing. (7) कदाचित्, ever (8) मार्गस्य मध्ये इति मध्येमार्गम्. (9) Generous, liberal. (10) Lit. head-jewel; the whole means foremost of donors. (11) Aorist of जन् with सम्. 3rd pers. sing. (12) Copper plate grants.

2. Name & dissolve the compounds underlined in the above passages.

2. ज्ञानमेव दीपः—ज्ञानदीपः (Karm.)
महांश्चासौ वायुश्च—महावायुः (Do.)
ज्ञानदीपस्य महावायुः (Tatp.)
शाणे उत्कषणम्—शाणोत्कषणम् (Do.)
न लब्धम्—अलब्धम् (Do.)
अलब्धं शाणोत्कषणं यैः (Bahuvr.)
उद्यानाद्बहिः—बहिरुद्यानम् (Avyayî.)

Digitized by Google

कस्मै इति-किमर्थम् (Tatp.)
लोहं च ताम्रं च-लोहताम्रे (Dvandva)
लोहताम्रयोरभावः (Tatp.)

3. Write down the forms of the acc. and instr. of **महत्** m., **उपेयिवस्** m. and n., **पुंस्**, **पथिन्**, **सखि** and **दोष्**.

3.	Accusative.			Instrumental.		
	महान्तम्	महान्तौ	महतः	महता	महद्भ्याम्	महद्भिः
m.	उपेयिवांसम्	उपेयिवांसौ	उपेयुषः	उपेयुषा	उपेयिवद्भ्याम्	उपेयिवद्भिः
n.	उपेयिवत्	उपेयुषी	उपेयिवांसि	,,	,,	,,
	पुमांसम्	पुमांसौ	पुंसः	पुंसा	पुंभ्याम्	पुंभिः
	पन्थानम्	पन्थानौ	पथः	पथा	पथिभ्याम्	पथिभिः
	सखायम्	सखायौ	सखीन्	सख्या	सखिभ्याम्	सखिभिः
	दोषम्	दोषौ	दोषः / दोष्णः	दोषा / दोष्णा	दोर्भ्याम् / दोषभ्याम्	दोर्भिः / दोषभिः

4. Give the dat. sing. and plu. of **विश्वसृज्**, **मर्मस्पृश्**, **उदच्** m. **दिव्** and **खलपू**.

4.				
	विश्वसृजे	विश्वसृड्भ्यः	दिवे	द्युभ्यः
	मर्मस्पृशे	मर्मस्पृग्भ्यः	खलप्वे	खलपूभ्यः
	उदीचे	उदग्भ्यः		

5. Give the feminine forms of **नुदत्**, **शाम्यत्**, **आत्मीय**, **लघुतम**, **गाङ्गेय**, **त्रिंशत्तम**, **यशस्कर**, **वार्षिक**, **भयंकर**, **स्थापक**.

5. नुदती or नुदन्ती; शाम्यन्ती; आत्मीया; लघुतमा; गाङ्गेयी; त्रिंशत्तमी; यशस्करी; वार्षिकी; भयंकरा; स्थापिका.

6. Give (*a*) the 3rd pers. of the present of **गुह्**, **छो**, **कृ**, **नृ**; (*b*) of the imperfect of **शास्**, **निज्** parasm., **पिष्** and **रुद्**; and (c) of the aorist of **स्था** âtm., **मन्**, **तन्** par. and âtm., **दुह्** parasm. and âtm. and **भरज्**; and (*d*) the 2nd pers. of the perf. of **भी**, **वद्**, **अर्द्** and **वे** parasm. & âtm.

Digitized by Google

6.	Present.		Imperfect.		
गूहति	गूहतः	गूहन्ति	अशात्-द्	अशिष्टाम्	अशासुः
छ्यति	छ्यतः	छ्यन्ति	अनेनेक्-ग्	अनेनिक्ताम्	अनेनिजुः
किरति	किरतः	किरन्ति	अपिनट्-ड्	अपिंष्टाम्	अपिंषन्
नुवति	नुवतः	नुवन्ति	अरोदीत्-दत्	अरुदिताम्	अरुदन्

Aorist.

	अस्थित	अस्थिषाताम्	अस्थिषत
	अमंस्त	अमंसाताम्	अमंसत
(*par.*)	अतानीत् / अतनीत्	अतानिष्टाम् / अतनिष्टाम्	अतानिषुः / अतनिषुः
(*âtm.*)	अतनिष्ट / अतत	अतनिषाताम्	अतनिषत
(*par.*)	अधुक्षत्	अधुक्षताम्	अधुक्षन्
(*âtm.*)	अधुक्षत / अदुग्ध	अधुक्षाताम्	अधुक्षन्त
(*par.*)	अभ्राक्षीत् / अभार्क्षीत्	अभ्राष्टाम् / अभार्ष्टाम्	अभ्राक्षुः / अभार्क्षुः
(*âtm.*)	अभ्रष्ट / अभर्ष्ट	अभ्रक्षाताम् / अभर्क्षाताम्	अभ्रक्षत / अभर्क्षत

Perfect.

	विभेथ-विभयिथ / विभयांचकर्थ	बिभ्यथुः / विभयांचक्रथुः	बिभ्य / विभयांचक्र
	उवदिथ	ऊदथुः	ऊद
	आनर्दिथ	आनर्दथुः	आनर्द
(*par.*)	उवयिथ-ववविथ / ववाथ	ऊयथुः-ववथुः / ऊवथुः	ऊय-वव / ऊव
(*âtm.*)	ऊये / ऊवे	ऊयिवहे / ऊविवहे	ऊयिमहे / ऊविमहे

Digitized by Google

7. Give the rule about the change of the radical अ to ए and the dropping of the reduplicative syllable in the perfect, together with the exception with instances.

7. Vide Sanskrit Second Book pp. 77 and 78 Rules 1,2 and 3.

8. Write down the 3rd pers. sing. present of the causal of ह्वे, क्री and रुह्, and of the desiderative of रभ्, सिव् and बन्ध्.

8.

Causal.	Desiderative.
ह्वाययति	रिप्सति
क्रापयति	सुस्यूषति-सिसेविषति
रोहयति-रोपयति	विभन्त्सति

9. Translate into Sanskrit :—

Two or three days after that,[1] the jackal[2] was drinking[3] at the pond,[4] and the crocodile[5] saw him directly[6] and seized[7] his foot tightly ;[8] but the jackal said cunningly,[9] "you have seized a stick which is put here for measuring[10] the height[11] of the water." The crocodile looked at it, and thinking it to be really[12] a stick let it go ;[13] and the jackal leaped out[14] of the water and exclaimed,[15] "I have escaped,[1] or else he would have killed[17] and eaten me.

9. (1) Use the instrumental with ततः (2) 'स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः । शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥' (3) पानीयं पिबन् (4) 'वेशन्तः पल्वलं चाल्पसरः' (5) नक्र, कुम्भीर (6) अचिरेण, तत्क्षणम्, क्षणान्तरे, क्षिप्रम् (7) धृ, ग्रह् with नि (8) दृढम् (9) धौर्त्येन, छलेन (10) मा (11) उच्चत्वम्, उच्छ्रयः, उत्सेधः, उन्नतिः (12) तत्वतः, परमार्थेन (13) मुच्, त्यज् (14) उत्प्लुत्य बहिर्गम् (15) वद्, भाष् or उच्चैः with वद्, वच्, भाष्, गद्, &c. (16) दिष्ट्याहं पलायितः, भयात्त्रातः (17) Use the conditional.

Digitized by Google

1880.

1. Give the acc. sing., loc. du., and instr. plu. of:—**अहन्**, **उपानह्**, **जुह्वत्** masc. **जरा**, **तादृश्** neut. **दधि**, **नृ**, **सम्राज्**, and of the feminine of **तेनिवस्**.

1.	*Sing.*	*Du.*		*Plu.*	
अहः	दधि	अह्नोः	दध्नोः	अहोभिः	दधिभिः
उपानहम्	नरम्	उपानहोः	न्योः	उपानद्भिः	नृभिः
जुह्वतम्	सम्राजम्	जुह्वतोः	सम्राजोः	जुह्वद्भिः	सम्राड्भिः
जराम्-जरसम्	तेनुषीम्	जरयोः-सोः	तेनुष्योः	जराभिः	तेनुषीभिः
तादृक्-ग्		तादृशोः		तादृग्भिः	

2. Give the 2nd. sing. Imperat. par. and the 3rd sing. Imperf. par. of **छिद्**, **पिष्**, **भी**, **व्यध्**, **श्रु** and **हन्**.

2.	*Imperative.*	*Imperfect.*	
छिन्द्धि	विध्य	अच्छिनत्-द्	अविध्यत्
पिण्ड्ढि	शृणु	अपिनट्-ड्	अशृणोत्
बिभीहि-भिहि	जहि	अबिभेत्	अहन्

3. Give the 3rd plur. of the perfect of **लभ्**, **वद्** âtm., **ऋ**, **सु**, **डु** âtm. and **ह्वे** par.

3. लेभिरे, ऊदिरे, आरुः, पुप्लुवुः, जह्निरे, जुहुवुः.

4. Give the 2nd dual of the aorist of **सुष्** par., **पद्**, **दृध्**, **यम्** âtm., **क्रुश्** and **तॄ** par.

4. असोषिष्टम्, अपत्साथाम्, अवर्धिषाथाम्-अवृधतम्, उपायंसाथाम्-उपायसाथाम्, अक्रुक्षतम्, अतारिष्टम्.

5. Give the rule for the optional insertion of **इ** in the 2nd sing. perf. par.

5. Vide Sanskrit Second Book pp. 70 Rule 3.

Digitized by Google

6. Translate into English :—

(*a*) जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते स्म । तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेन इति । तेषु तत्सत्रमुपासीनेष्वागच्छत्सारमेयः । स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीपमुपागच्छन् । तं माता रोरूयमाणमुवाच । किं रोदिषि । केनास्यभिहत इति । स एवमुक्तो मातरं प्रत्युवाच । जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति । तं माता प्रत्युवाच । व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति । स तां पुनरुवाच । नापराध्यामि किंचित् । नावेक्षे हवींषि नावलिंह इति । तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्ता तत्सत्रमुपागच्छद्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घसत्रमुपास्ते ॥

(*b*) पङ्गो वन्द्यस्त्वमसि न गृहं यासि योऽर्थी परेषां
धन्योऽन्ध त्वं धनमदवतां नेक्षसे यन्मुखानि ।
श्लाघ्यो मूक त्वमसि कृपणं स्तौषि नार्थाशया यः
स्तोतव्यस्त्वं बधिर न वचो यः खलानां शृणोषि ॥

6. (1) तेषु तत्सत्रं &c. is a locative absolute. When they were engaged in the performance of the sacrifice &c. आसीनेषु is pres. part. of आस्. (2) Pres. part. of the frequentative of ह् to cry. Crying bitterly. (3) Evidently, surely (4) Offended, committed some fault. (5) हविषामवेक्षणमपि न कृतं तत्रावलेहनं दूरतोऽपास्तम्. Did not even look at the offerings. (6) Did not lick. (7) Oh lame man, cripple (8) A miser.

7. Dissolve the underlined compounds in the above, and state to which class each belongs.

Digitized by Google

7. भीमा सेना यस्य सः (Bahuvrihi.)
पुत्रस्य दुःखम्-पुत्रदुःखम् (Tatpurusha.)
पुत्रदुःखेणार्ता-पुत्रदुःखार्ता (Do.)
अर्थस्य or अर्थं प्रति आशा—अर्थाशा तया (Do.)

8. Translate into Sanskrit:—

(*a*) Two Anuṣṭubh verses contain 64 syllables.

(*b*) He ruled (perf. of ईश्) over the whole earth.

(*c*) Sîtâ was dearer[1] to him than any other woman[2].

(*d*) He has taught (aor. of caus. इ with अधि) Râma the Veda.

(*e*) As the bee[1] collects[2] nectar[3] and departs without injuring[4] the flower[5] or its colour[6] and scent,[7] so let the sage dwell[8] on earth.

(*f*) A man is not a Muni because he observes silence[1] if he is foolish and ignorant, but the wise who, taking the balance[2] chooses[3] the good[4] and avoids[5] evil[6]—he is a Muni.

8 (*a*) अनुष्टुप्श्लोकयोः चतुःषष्टिरक्षराणि सन्ति or भवन्ति.

(*b*) ईश् governs a genitive.

(*c*) (1) प्रेयसी. (2) Use the ablative.

(*d*) Use both Râma and Veda in the accusative.

(*e*) (1) ' मधुव्रतो मधुकरो मधुलिण्मधुपालिनः । द्विरेफपुष्पलिड्भृङ्गषट्पद-भ्रमरालयः ॥ ' (2) चि, अवचि (3) ' मधु क्षौद्रं माक्षिकादि, ' पुष्परस (4) अङ्गे-शयन्, अङ्गेशयित्वा. (5) 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' (6) वर्ण (7) गन्ध (8) वस्तेत्.

(*f*) (1) मौनमास्था, मौनं समाचर्-आचर् (2) तुला (3) ग्रह् (4) सत् (5) वृज्, वृज् with परि (6) असत्.

Digitized by Google

1881.

1. Combine according to the rules of Sandhi, mentioning the particular rules applicable to the expressions underlined :—(*a*) अग्राविष्णू अमू इज्येते अस्यां इष्टौ (*b*) आगच्छ भोः ऋषिदारक (*c*) ते एव एते असुराः उपायनहराः (*d*) पितः रक्ष (*e*) कर्तृ उत (*f*) प्र एजते (*g*) मधुलिह् संततिः अस्मिन् चन्दनपादपे अस्ति.

1. (*a*) अग्राविष्णू अमू इज्येते अस्यामिष्टौ (*b*) आगच्छ भो ऋषिदारक (*c*) त एवैतेऽसुरा उपायनहराः (*d*) पिता रक्ष (*e*) कर्त्रुत (*f*) प्रेजते (*g*) मधुलिट् (ट्त्सं) संततिरस्मिंश्चन्दनपादपेऽस्ति.

The rules may be given by the student.

2. Give the nom. (fem.) and (neu.) of उपेयिवस्, जग्मिवस् and जगन्वस्; also the acc. and instr. of अन्वच् (m. and n.) अनड्वह्, मूर्धन् and गो.

2.

Nom.

	Sing.	*Dual.*	*Plu.*
Fem.	उपेयुषी	उपेयुष्यौ	उपेयुष्यः
Neut.	उपेयिवत्	उपेयुषी	उपेयिवांसि
Fem.	जग्मुषी	जग्मुष्यौ	जग्मुष्यः
Neut.	जग्मिवत्	जग्मुषी	जग्मिवांसि
Fem.	जग्मुषी	जग्मुष्यौ	जग्मुष्यः
Neut.	जगन्वत्	जग्मुषी	जगन्वांसि

	Acc.			Instr.		
	Sing.	*Dual.*	*Plu.*	*Sing.*	*Dual.*	*Plu.*
m.	अन्वञ्चम्	अन्वञ्चौ	अनूचः	अनूचा	अन्वग्भ्याम्	अन्वग्भिः
n.	अन्वक्-ग्	अनूची	अन्वञ्चि	,,	,,	,,
	अनड्वहम्	अनड्वाहौ	अनड्वहः	अनड्वाहा	अनड्वद्भ्याम्	अनड्वद्भिः
	मूर्धानम्	मूर्धानौ	मूर्ध्नः	मूर्ध्ना	मूर्धभ्याम्	मूर्धभिः
	गाम्	गावौ	गाः	गवा	गोभ्याम्	गोभिः

3. Decline पति, सेनापति and चतुर् f., and give the acc. (m. and n.) and the fem. forms of दिशत्, भवत्, ददत्, यात् and युञ्जत्.

Digitized by Google

3. पति-

	Sing.	*Du.*	*Plu.*
Nom.	पतिः	पती	पतयः
Acc.	पतिम्	,,	पतीन्
Instr.	पत्या	पतिभ्याम्	पतिभिः
Dat.	पत्ये	,,	पतिभ्यः
Abl.	पत्युः	,,	,,
Gen.	,,	पत्योः	पतीनाम्
Loc.	पत्यौ	,,	पतिषु
Voc.	पते	पती	पतयः

सेनापति-

	Sing.	*Du.*	*Plu.*	*Plu.*
Nom.	सेनापतिः	सेनापती	सेनापतयः	चतस्रः
Acc.	सेनापतिम्	,,	सेनापतीन्	चतस्रः
Instr.	सेनापतिना	सेनापतिभ्याम्	सेनापतिभिः	चतसृभिः
Dat.	सेनापतये	,,	सेनापतिभ्यः	चतसृभ्यः
Abl.	सेनापतेः	,,	,,	,,
Gen.	,,	सेनापत्योः	सेनापतीनाम्	चतसृणाम्
Loc.	सेनापतौ	,,	सेनापतिषु	चतसृषु
Voc.	सेनापते	सेनापती	सेनापतयः	चतस्रः

Accusative.

m.	दिशन्तम्	दिशन्तौ	दिशतः
n.	दिशत्	दिशती-दिशन्ती	दिशन्ति
m.	भवन्तम्	भवन्तौ	भवतः
n.	भवत्	भवती	भवन्ति
m.	ददतम्	ददतौ	ददतः
n.	ददत्	ददती	ददति-ददन्ति
m.	यान्तम्	यान्तौ	यातः
n.	यात्	याती	यान्ति
m.	युञ्जन्तम्	युञ्जन्तौ	युञ्जतः
n.	युञ्जत्	युञ्जती	युञ्जन्ति

Fem. Forms—दिशती-दिशन्ती, भवन्ती, ददती, याती-यान्ती, युञ्जती.

Digitized by Google

4. Explain what you understand by the terms वृद्धि, संप्रसारण, सेट्, अनिट् and अभ्यास.

4. वृद्धि–See Paper for 1862.
संप्रसारण– Do. „
सेट्, अनिट्–Vide Sanskrit Second Book pp. 69 Rule 1.
अभ्यास. When a root is reduplicated the syllable that is added is called अभ्यास. (Reduplicative syllable.)

5. Write down the forms of the 3rd pers. of the perf. of वन्, भम्, तॄ, स्तृ and इष्; and the 3rd pers. aorist and 2nd pers. future of यम्, स्पृश्, वस् and प्रच्छ्.

Perfect.

Sing.	*Du.*	*Plu.*	*Sing.*	*Du.*	*Plu.*
ववने	ववनाते	ववनिरे	ततार	तेरतुः	तेरुः
बभ्राम	बभ्रमतुः / भ्रेमतुः	बभ्रमुः / भ्रेमुः	तस्तार	तस्तरतुः	तस्तरुः
			इयेष	ईषतुः	ईषुः

Aorist.			2nd Future.		
अयंसीत्	अयंसिष्टाम्	अयंसिषुः	यंस्यसि	यंस्यथः	यंस्यथ
अस्पार्क्षीत् / अस्प्राक्षीत्	अस्पार्ष्टाम् / अस्प्राष्टाम्	अस्पार्क्षुः / अस्प्राक्षुः	स्पर्क्ष्यसि / स्प्रक्ष्यसि	स्पर्क्ष्यथः / स्प्रक्ष्यथः	स्पर्क्ष्यथ / स्प्रक्ष्यथ
अवात्सीत्	अवात्ताम्	अवात्सुः	वत्स्यसि	वत्स्यथः	वत्स्यथ
अवसिष्ट	अवसिषाताम्	अवसिषत	वसिष्यसे	वसिष्येथे	वसिष्यध्वे
अप्राक्षीत्	अप्राष्टाम्	अप्राक्षुः	प्रक्ष्यसि	प्रक्ष्यथः	प्रक्ष्यथ

1st Future.

यन्तासि	यन्तास्थः	यन्तास्थ
स्प्रष्टासि / स्पर्ष्टासि	स्प्रष्टास्थः / स्पर्ष्टास्थः	स्प्रष्टास्थ / स्पर्ष्टास्थ
वस्तासि	वस्तास्थः	वस्तास्थ
वसितासे	वसितासाथे	वसिताध्वे
प्रष्टासि	प्रष्टास्थः	प्रष्टास्थ

Digitized by Google

6. Give the 3rd pers. sing. present of the pass. and of the desid. of दा, ग्रह्, कृ, दिव् and भिद्.

6.

Passive.	Desiderative.
दीयते	दित्सति
गृह्यते	जिघृक्षति
क्रीर्यते	चिकरिषति
दीव्यते	दुद्यूषति or दिदेविषति
भिद्यते	बिभित्सति

7. Translate into English :—

(*a*) सखे, प्रतिपालय माम्। अहमपि भवन्तमनुयास्यामि। न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी। कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकैकपद उत्सृज्य प्रयासि। कुतस्त्वेयमतिनिष्ठुरता। कथय। त्वदृते क्व गच्छामि, कं याचे, कं शरणमुपैमि। अन्धोऽस्मि संवृत्तः, शून्या मे दिशो जाता, निरर्थकं जीवितं, केन सह परिभ्रमामि। कमालपामि। उत्तिष्ठ देहि मे प्रतिवचनम्।

(*b*) किं प्राभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्।

7. (1) Wait for me (2) At once (3) Blank, void (4) Third pers. sing. conditional of भू with प्र; would he have been able? &c. (5) The sun (6) Foremost, in front; loc. sing. of धुर्. Would Aruṇa have been able to destroy darkness had not the Sun made him precede him or go before him?

8. Name and dissolve the various compounds in the following:—

अनियतरुदितस्मितं विराज-
त्कतिपयकोमलदन्तकुड्मलाग्रम्।

Digitized by Google

वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जुजल्पितं ते ॥

8. रुदितं च स्मितं च–रुदितस्मिते (Dvandva)
न नियते–अनियते (Tatpurusha)
अनियते रुदितस्मिते यस्मिन्–तत् (Bahuvrîhi.)
कोमलाश्च ते दन्ताश्च–कोमलदन्ताः (Karmadhâraya.)
कतिपये कोमल०–कतिपयकोम० (Do.)
कति० दन्ता एव कुड्मलाः–कति० (Do.)
तेषां अग्राणि (Tatpur.)
विराजन्ति कति०——ग्राणि यस्मिन्–तत् (Bahuvrîhi.)
वदनमेव कमलकम्–वदनकमलकम् (Karm.)
स्खलच्च तदसमञ्जसं च मञ्जु च तत् (Do.)
————————जल्पितं यस्मिन्–तत् (Bahuvrîhi)

9. Translate into Sanskrit:—

(*a*) At that time, ninety-nine were examined, of whom fifty-four were found to be good grammarians.

(*b*) Did you milk the cows?

(*c*) Brâhmans repeating the Vedas are like frogs (वर्षाभू) croaking in the rains.

(*d*) He has pounded the medicine, emptied the vessel, put that powder into it, poured water, and placed it on the fire (Aor. froms to be used).

(e) Leave[1] me a while[2] to meditate[3] alone,
That here in still communion with my self[4]
And cool abstraction from all other objects,[5]
I may devote my mind[6] entire[7] to you.

9. (*e*) (1) मुच् (2) क्षणम् (3) ध्यै (4) आत्मन्यात्मानं दृष्ट्वा (5) विषयपराङ्मुखो भूत्वा, विषयेभ्यः परावृत् (6) मनो निवशय्, विनियोज्. (7) कात्स्न्येन, साकल्येन, सम्यक्.

Digitized by Google

1882.

1. Join according to Sandhi rules:—**सुधी + ऋषिः ; गच्छन् + शेते ; उत्+स्तम्भनम् ; सन्+ईश्वरः ; सुगण् + सु ; तृह्+त ; देवाः + आगताः ; प्रातः + ऋद्धौ.**

1. सुध्यृषिः-सुधी ऋषिः ; गच्छञ् शे (ञ्चृशे-ञ्छे-ञ्च्छे) ते ; उत्तम्भनम् ; सन्नीश्वरः ; सुगण्सु-सुगण्ट्सु-सुगण्ठ्सु ; तृढ ; देवा आगताः ; प्रातर्ऋद्धौ.

2. Resolve into different words :—**सुखार्तः ; पतञ्जलिः ; रामेति ; तृप्यत ईट्क्.**

2. सुख+ऋतः ; पतन्+अञ्जलिः ; राम+इति ; तृप्यते+ईट्क् or तृप्यतः+ईट्क्.

3. Give three instances of one and the same thing being denoted in Sanskrit by three words in the three different genders.

3. A wife is denoted by दाराः *m.* भार्या, जाया *f.* कलत्रम् *n.*
A road.....मार्ग, अध्वन् *m.* पदवी, सृति *f.* अयनम्, वर्त्मन् *n.*
An egg ..... कोश *m.* पेशी *f.* अण्डम् *n.*

4. Give the genders of the following :—**तिथि ; राशि ; विघ्न ; नाभि ; गृह ; अर्ध.**

4. तिथि *m. f.* ; राशि *m.* ; विघ्न *m.* नाभि *m. f.* ; गृह *m. n.* ; अर्ध *m. n.*

5. Give (*a*) nomin. sing. of **प्राञ्च्,* द्रुह्, सखि, आप्.** (*b*) the accus. plu. of **ग्रामणी, विश्ववाह्, अष्टन्, ददत्** *n.* **तिर्यच्.** (*c*) the dative sing. of **वातप्रमी, बहुश्रेयसी, मघवन्.** (*d*) ablat. sing. of **गो, क्रोष्टु, पथिन्.** (*e*) loc. plur. of **अदस्** *m.* **परिव्राज्.**

5. (*a*) प्राङ् *m.* प्राक् *n.* ; ध्रुक्-ग्-ट्-ह् ; सखा ; आप् has no sing. (*b*) ग्रामण्यः ; विश्वौहः ; अष्टौ-अष्ट ; ददति-ददान्ति ; तिरश्चः *m.* तिर्यञ्चि *n.* (*c*) वातप्रम्ये ; बहुश्रेयस्यै ; मघवते-मघोने. (*d*) गोः ; क्रोष्टोः-क्रोष्टुः ; पथः. (*e*) अमीषु ; परिव्राट्सु-परिव्राट्त्सु.

6. Give—(*a*) Present 3rd pers. sing. of **वृध्*, मृ, स्पृह्.** (*b*) Imperf. 2nd per. sing. of **शास्, ग्रह्, रुद्.** (*c*) Imper. 2nd

* प्राञ्च् is for प्राच्.

Digitized by Google

per. sing. of लू, हा to abandon, अस. (*d*) Perfect 2nd per. sing. of तृप्, राज्, जन्, भास्, विद्. (*e*) Aorist 3rd per. sing. of दा, इ, बन्ध्, स्पृश्. (*f*) Future in स्य 3rd per. sing. of तृध्, गम्, दृ. (*g*) Causal present 3rd pers. sing. of हन्, शम्, भी, रुह्. (*h*) Desider. of श्रु, तन्, बुध्.

6. (*a*) वर्धते, म्रियते, स्पृहयाति-ते. (*b*) अशात्-द्-शाः, अगृह्णाः अगृण्हीथाः, अरोदीः-दः. (*c*) लुनीहि (*par.*) लुनीष्व (*âtm.*) जहाहि-हीहि-हिहि, एधि (to be) अस्य (to throw). (*d*) ततर्पिथ-ततर्थ-तत्रप्थ, रेजिथ-रराजिथ (*par.*) रेजिषे-रराजिषे (*âtm.*); जज्ञिषे (4th.) जजनिथ (3rd); आसांचक्रुषे; विवेदिथ-विदांचकर्थ (to know) 2nd conj.; विविदिषे (to be) 4th conj.; विवेदिथ (*par.*) विविदिषे (*âtm.*) (to get) 6th conj., विविंदिषे (to think) 7th conj.; वेदयांचक्रुषे (to feel, know &c.) 10th conj.; (*e*) अदात्-अदित (to give) अदासीत् (to cut); अगात्; अभान्त्सीत्; अस्प्राक्षीत्-अस्पार्क्षीत्-अस्पृक्षत्. (*f*) वर्धिष्यते-वत्स्र्यति; गमिष्यति (*par.*) हरिष्यति. (*g*) घातयति, शमयति-शामयति; भीषयते-भाययति-भापयते; रोहयति-रोपयति. (*h*) शुश्रूषते; तितंसति-तनिषति-तांसाति; बुबोधिषति-बुभुत्सति.

7. (*a*) Name the principal divisions of compounds with their subdivisions.

(*b*) Name and dissolve the following compounds:—**आपन्नविद्यः, परस्मैपदम्, नक्षत्रम्, कूपमण्डूकः, स्नातानुलिप्तः, मुखकमलम्, निष्कौशाम्बिः, द्वित्राः, घृतगन्धि, अहिनकुलम्.**

(*c*) Join the following in a compound:—**ग्रामं + प्राप्तः; ब्राह्मणस्य + कर्तव्यम्; नृणां + श्रेष्ठः; शार्ङ्ग + धनुष्; जाया + पतिः.**

7. (*a*) Vide Sanskrit Grammar (2nd Edition) pp. 251–266.

(*b*) आपन्नो विद्याम्—आपन्नविद्यः (Tatpurusha).
परस्मै पदम्—परस्मैपदम्. (Aluksamâsa Do.)
न क्षरति, क्षयति—नक्षत्रम्. (Nañtatpurusha).

---

* Probably वृध् is meant and not वध्. If बुध् is meant the forms will be बोधति-ते (1st) बुध्यते (4th).

Digitized by Google

कूपे मण्डूक इव—कूपमण्डूकः. (Tatpurusha).
आदौ स्नातः पश्चादनुलिप्तः—स्नातानुलिप्तः. (Karmadhâraya).
मुखं कमलमिव—मुखकमलम्. (Karmadh.)
निष्क्रान्तः कौशाम्ब्याः—निष्क्रौशाम्बिः. (Tatpurusha).
द्वौ वा त्रयो वा—द्वित्राः (Bahuvr.).
घृतगन्धोऽस्ति यस्य तत्—घृतगन्धि. (Do.)
अहयश्च नकुलाश्चैषां समाहारः—अहिनकुलम्.

(c) प्राग्ग्रामः, ब्राह्मणस्य कर्तव्यम्, नृणां श्रेष्ठः, शार्ङ्गधन्वा, जायापती-दंपती-जंपती.

8. What cases do विना, स्वस्ति, ऋते and अलं govern ?

8. विना governs the acc., instr. or ablative.
स्वस्ति ..... the dative.
ऋते ..... the ablative.
अलं ..... the instrumental or dative. The sense however is different. तव श्रमेणालम् Enough with your endeavour i. e, do not trouble yourself any more. विष्णुर्दैत्येभ्योऽलम् Vishnu is a match for the demons.

9. Translate into English :—

(a) अस्ति कस्मिंश्चित्समुद्रोपकण्ठे महाजम्बूपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति। तस्य तरोरधस्तात्कदाचित्करालमुखो नाम मकरो न्यविशत्। तस्मै वानरो जम्बूफलानि ददौ। स तानि भक्षयित्वा गोष्ठीसुखमनुभूय स्वभवनमगात्। एवं नित्यमेव कालं नयन्तौ वानरमकरौ सुखेन तिष्ठतः। सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वभार्यायै प्रयच्छति। अथान्यतमे दिवसे सा प्रोवाच। यदि मया भार्यया ते प्रयोजनं तर्हि देहि मे तस्य हृदयमिति। स आह। भद्रे मैवं वद। यतः स प्रतिपन्नोऽस्माकं भ्राता। अपरं फलदाता। ततो व्यापादयितुं न शक्यते। तत्त्यजैनं मिथ्या-

Digitized by Google

ग्रहमिति । अथ मत्कर्याह । नूनं सा वानरी भविष्यति । तत्त्वं ज्ञातो मया सम्यक् ।

सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या ।
अस्माकमस्ति न कथंचिदिहावकाश-
स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥

अपरं सा तव वल्लभा यदि न भवति तत्किं मया भणितेऽपि तां न व्यापादयसि । अथ यदि स वानरस्तत्कस्तेन सह तव स्नेहः । किं बहुना यदि तस्य हृदयं न भक्षयामि तन्मया प्रायोपवेशनं कृतमिति विद्धि ।

(b) आसीच्च मे मनसि तेदंतिकष्टासु दशास्वपि जीवितानि-रपेक्षा न भवन्ति खलु प्राणिनां वृत्तयः । नास्ति जीवितादन्य-दभिमततरमिह जगति जन्तूनाम् । धिङ् मामतिनिष्ठुरं येन मयो-पेरते ताते जीव्यते । उपकृतमपि नापेक्षते खलं हि खलु मे हृदयम् । अतिकृपणः खल्वमी प्राणा यदुपकारिणमपि तातं नानु-गच्छन्ति । सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा यदी-दृशावस्थमपि मामायासयति जलाभिलाष इति ।

9. (1) Near the sea. (2) Always bearing or yielding fruit. (3) Below. (4) A proper name; it means however 'one who has terrible mouth, jaws.' (5) Had stationed himself, resided. (6) Experiencing the pleasure derived from each other's conversation. (7) Those that remained after he ate. (8) One day. (9) If you have (really) to do any thing with your wife, if you have any regard for your wife &c. (10) Has become. (11) False notion; wrong, useless importunity. (12) She must be a monkey (female). (13) With (hundreds of desires).

Digitized by Google

(14) O cunning fellow. (15) Pleasing on account of her artificial charms (assumed for the time). (16) Room. (17) Enough. (18) Mock prostrations. The whole means, do not trouble yourself (with trying to please me) by prostrating before me (when you really hate it, do not like to do so). (19) Determination to starve oneself. (20) तदा + अतिकष्टासु. (21) Regardless, despairing of life. (22) Inclinations i.e. tendency. (23) Dead (24) It is not that any one is not made a खल i. e. every one is made so. (25) Desire of (prolonging) life. (26) Though in such a state.

10. Translate into English (? Sanskrit):—

(*a*) There lived in a certain forest a lion named Pingalaka. He had a jackal by him[1] who was his constant attendant.[2] Once on a time that lion had a fight with an elephant,[3] and had so many wounds[4] inflicted on his body that he was not able to move even one step.[5] Owing to the lion's not stirring from his den,[6] the jackal became very weak for want of food.[7] One day he said to the lion, 'O Lord! I am overpowered[8] by hunger;[9] how can I serve you in this condition?' The lion replied, 'if it be so, then you can find out an animal, and I will kill it for you even in this languid state of health.

(*b*) It is as his teacher that he respects me and not as his father.

(*c*) That one undeserving of a salutation is often saluted is due to the power of wealth.

10. (*a*) (1) निकटे (2) नित्यसेवकः (3) 'दन्ती दन्तावलो हस्ती दिरदोऽनेकपो द्विपः। मतङ्गजो गजो नागः कुञ्जरो वारणः करी॥ इभः स्तम्बेरमः पद्मी' (4) प्रहार (5) पदमपि चलितुं न शक्तः (6) गुहाया अनिष्क्रमणात्. (7) अन्नाभावेन (8) परीत, अर्दित, पीडित (9) 'अशनाया बुभुक्षा क्षुध्.

(*b*) स मां गुरूरहमिति पूजयति-संमानयति न पितेति.

(*c*) 'स हि प्रभावो वित्तस्य यदवन्द्योऽपि वन्द्यते.'

Digitized by Google

Digitized by Google

NOTICE.

Copies can be had at Messrs. V. Kámat and Co. near Thakurdwar, Breach Candy Road or at the Nirṇayasâgara Press, Kâlbâdevi Road, Bombay.

41 - 36 4

Digitized by Google